मपिहेतुमत्वेनातिप्रसंगात् हेतुमांश्च प्रेरणादिरेवहेतुत्वकर्तास्येति व्याख्यानात् तदाह प्रयोजकव्या
पारे इति एवं चायं पदं यत्नात्वेन तस्य विशेषणतायतो गमितो ग्रामं देवदत्तो यज्ञदत्तेनेत्यादौ प्रायोन्वि
तमात्यर्थस्यात्कर्तरि क्तस्य प्राप्ते रिति भाष्यस्पष्टविशेष्यतेन या चयति देवदत्तो यज्ञदत्तेनेत्यादौ प्रयातीभू
तव्यापाराणामप्यत्वेन प्रयोज्यस्य कर्तृत्वेनान्वयत्वपरिस्यापायेनाह वाच्ये इति ओः पुयणः अपरापरस्मादिति ब
हुव्रीहिर्नतयस्येति गुपणादीनामकारावयवकत्वाभावात् णोङ्कृतादेशस्य स्थानिवत्त्वस्थापनाङ्गस्य इति हि
त्वमन्वयात्वेनैव दीर्घलघोरिति दीर्घस्यादाहाडीभवदिति अपर इति वर्णनेन तद्बहुव्रीहिरन्यपदार्थप्रत्या
सत्यापात्वत्तस्मैव तदाहावर्णपर इत्यादि पककृत्स्नविवयानेनसामर्थ्यात्म्लहन्ति ओः सुपुणिंसमस्यत
तेव्यवधाने प्रवृत्तिर्मीनाभावात् अनपवपुष्कारयिष्यतीत्यादि सिद्धेः अवर्णपर इति किं सम्बुधति
अचीचकासदिति चङ्परोणौ यदङ्गं तस्य योऽभ्यास इति व्याख्यान्ह रगमर्वाचो मतमपतत मतात

६६
66

रइति बहुपदेशोपि यह्लायितिं भाष्यमेतेनैतेपदं इत्यर्थः । ब्रूम्रायमीति ब्रीहिवद्धिरित्यादौ सन्निज्ञावस्यायुपल
त्तणमिदं शास्त्रनिमित्तकशास्त्रलोपस्य स्थानिवत्वेन बहुपदेशापदर्थाया नन्वस्त्वाद्योगभावात्तु नयोरभेवश्च
यिद्वेषाथम् । एणाहृनीति नेत्रानित्यादौ गन्याहृमिति निर्देशवदिति भावः । एतेन वर्णग्रहणे एव जातिग्रहणा
नान्यत्रेति परास्तम् । एवं बहुपदेशोपि जात्याख्यायामेकानेकव्यक्तिपरेत्यर्थ इति बोध्यम् । इदं वह्मत्यन्तेरोपे
नपरेत्व आकृतिनिर्देशोऽनुक्तः जातेः पर्यायपर्याभावेन हृस्वसन्निज्ञावविधायके बहुपदेशाविति वि
शेषणसंगतेः व्यक्तिद्वारकपर्यायपर्यायमिति हलन्ताच्चेति सूत्रके यटोक्तम् । नन्वनयुक्तं द्विमीयायाप्यायस्य
आर्धधातुक इति सूत्रे जातिनिर्देशाज्जात्याः पर्यायपर्यायसंभवेन विषयसप्तमीति भाष्यासंगम्यापन्यानन्तम्
केपर्यायपर्यंसिन्यसंभवनत्वात् । किं च शास्त्रविन्यस्याग्रलोपविशेषणत्वेन शास्त्रजातिनिमित्तकाग्लोपस्यार्थे
नयकशास्त्रनिमित्तकापरशास्त्रलोपस्यापरत्वजातिनिमित्तकत्वेनाग्लोपितं डुर्वीरशास्त्रमात्याप्यानेकनिमित्तके
त्यर्थे डचकथादित्यादौ दोषः । एकशास्त्रजेनैतावन्मात्रनिमित्तकस्यैवाग्लोपस्य ग्रहणमनेकसत्त्वे बनेकतिमि
त्तकस्यैवग्रस्य ग्रहणमित्यर्थस्य शाब्दपर्यादयान्लाभः अनेकशास्त्रनिमित्तकाग्लोपस्याप्रसिद्धत्वाच्च । अन्यपवस
त्वम्न्त्रेणे च शास्त्रवण्णिच्चुपसंख्यानमेवाक्रम भाष्यइत्याहुः तोञ्चस । अवणो चमंच्छेदोरितिविषयसप्त

मीपवेवचनयोर्विवक्षितत्वयोरंगसंगत्वात् ह्रस्वादेः पूर्वं संप्रसारणमन्वर्थानंतरंगत्वात् ह्रस्वाभावाः कृतेयोःपश्चात्संप्र
सारणेपि सूत्रशावदित्यायमित्युक्तिमदाह संप्रसारणं नदाष्प्रयेचेति नन्विषयेयरिभाष्येति अमित्यंतस्याभाष्य
प्रत्याख्यानात् सेवुमित्युपसर्गेति उपसर्गादितिवक्तव्यमितिवार्त्तिकात् तत्फलमुदाहरति न्यसीवहदिति
अत्राभ्यासनिमित्तेष्वत्वंभवत्येवेतिभावः अदादिक्रमादिति अन्यथानित्यत्वाद्धित्वे उपधालोपाभावात् प्राप्यभा
वेकिंतेनमाभवत्विति अत्रपदत्कत्वमदेत्यपनीयत्रोक्तम् ऋदिदिति कङ्परेणोपलक्षतत्वराभ्यासाभा
वात्न दीर्घः अजादेरित्येवेति अजादेरिति चकर्मधारयात्पंचमी आदिभ्यादचः परं इत्यर्थः तेनेहद्वित्वमी
त्यादेदस्मनदित्वनिषेधः स्पष्टचेदंसंयोगसत्तास्तत्रेभाष्ये तत्रहिनत्व इत्यत्रजादेरितिवर्तनं इत्युक्तमदिद्द
वदिति नतुलावस्यायामडितिपतेयादेरचःपरस्यमस्तवकिंचवृद्धीतिद्वित्वमात्परत्वादपिप्रथममतस्याप्य
इतिचेन्नतद्धि इत्यस्याधिकारस्तत्रत्वेननत्वमूत्रेअयस्थितोनत्रयातोरितिमत्वेनप्रत्यासमप्याकाख्यानेनतद्धया
त्वसत्ताकालिकादादेरचः परान्नदरादत्वपर्यांतदोषः इत्यादः ईहृषामासमभियानेहृष्टमातांविंत्यामिति कश्चित्
कापिवारिणिद्वितीयः पवर्गीयादिः लोटिलोचयइति आयद्वर्गप्रथमोपधः चोपयेमाः वारिणिलाटीति आयोदे
त्याद्यादिःद्वितीयषष्ठद्वितीयोपधः अत्रपूर्वपदमाष्ठ इत्युक्तंन्यासादिमतस्याप्रामाणिकत्वस्तचितं स्वोपस्त्र

ङि चङीति विषयसप्तमीतेन पूर्वं मेघसा णेर्द्विर्वे घा ह्यासामाग्र ग्रया शाद्दे नालुविकरणत्वादलालिणकत्वाद्युपिवत्तेरे
वग्रहणमितिकैयटः ङ्के सप्र णौ प्रसंचङीत्यनुवर्तनेसा च विषयसप्तमी लोपः यि प्रभ्यासेकार सन्नियोगशि
ष्टत्वात् द्वित्वे कृते उपधालोपः अर्थयतीति हृद्विवा द्वित्वा नित्यत्वान्तरङ्गत्वाच्च णिलोपः यल्लोपः इति लोपो बाधितव्यत्वेन
यानेर्णौ पुक इति अर्तिह्रीत्यसोनार्थः अत्र लुगागमस्य वपास्ग्रहणेत्यनेन स्फायो सिद्धयागमानरनिहृत्ये
वचनेनैवाप्तु अत्र ञानेरेवग्रहणेन वेञोनापि वेञ्व्यस्य लालणिकत्वात्साधवयकमाच्च केशान्वाययतीति
स्तंभीकरोतीत्यर्थः लीयतेरिति लीलीङोरित्यर्थः लातेश्चेति आदादिकस्य लाताम्व लीयतेश्चेत्यर्थः व्याख्या
नादिति वाप्यस्य विपातनेद्रवीकरणानार्थकत्वात्तस्यापि स्यान्निवत्वेन लीनो लुक् दत्तश्चाह लीयतेश्चत्वेम
नाभिभवेत्यादि यद्यपि भाष्ये लीयतेः प्रलंवनशालीनीकरणयोर्नित्यमित्य व दिने तथापि नदात्त्वेनयद्वि
हयोपलक्षणेन पूजायामपीति कैयटः हयोरेवत्यपि मतान्तरे तेनैवोक्तमदमेव भाष्ये संमतं विशिष्य हयो
रेवोपादानात् अपीतीति तत्प्रकरणान्तर्व्यत्यपशिष्टार्थं ङि रव ङीङ णोणामित्यत्र पाठात् भाष्योणावित्युक्ते
ष्वलियःसे इहापि हयोर्ग्रहणं व्याख्यानामदाह लीङ्लियोरिति शालीनीकरणमभिभवः प्रयोजका
न्तर्येचेदिति हेतुमद्वेदिभयस्याव्यावर्तकत्वात्प्रश्नमन्ते न सप्तमापमपाश्रीयते इति भावः हेतुभयइत्युक्तेभ

यस्य याविन्यनुपपन्नमतश्चाह सूत्रे इति भीर्इति स्याम्लिवन्नहे भाष्ये स्पष्टमेतत् मित्यस्मद्धेतुभय इति वर्त
ते भय इति पात्त्वर्थोपलक्षणं तदाह हेतोस्मान्मय इति भाययतीति द्वितीयाविनाल्यमस्याकथं तर्हि विस्मापय
त्रिति आत्मनेपदेचनेत्यत्र वीजाभाव इति प्रश्नः उभौ तालव्यपकारावेव तिन दोष इत्युत्तरं यदेति
आत्मनेपदं भीस्मिप्रकृति कान्यपनादेवेति। नान्यपितास्यगविनिभावः। गोचमेम् अत्राधिकृतमार्थयात्मक इति।
विति चविषयस्मन्नमीतितिस्पष्टमाकरेतत्रादेशस्यानिवृद्धिनिमित्तकत्वापिनाजोद्वितीयापिकार्यणवचस्रादेशोमे
तिनप्रवर्त्ततेसतिद्वितस्मिन्जादेद्वितीयस्येतिणिचूपवद्धित्वेउत्तरखंडेवर्णापरत्वाभावात् अस्यावर्णादेशस्या
भावाच्च प्रजनेवीयतेः नायमपनादादिकत्वात् यकानिदेशास्तद्द्वार्थः वेजोग्रहणार्थं तत्ततस्मप्रजने
हृतौमानाभावात् तस्यशाब्दासमिद्धुगयावादयुक्तोविधानेनरूपविशेषाभावाच्चविचिस्वपीत्यादिसंप्रसारण
योग्यपाणितेभ्यः काक्यच्चूतस्ययोः संप्रसारणविधायकेविहितविशेषणयत्तदित्पदयोः फलेवपापद्धि
वभावस्यसत्वाच्च पतेनापनात्विप्यात्वपदत्वाः वेयाम्यादिरूपाणि नदभावपदेवेथ्यायाविन्यादि रूपाणीमि
विशेषेत्यपास्तम् विवोसार्वविकत्वाच्च अतएवभाष्येविभाषालीयतेरित्यत्रवात्रसमान्यग्रहणार्थत्वेनोत्नामि
त्यत्रत्यवाधित्र णाविनिवर्ततेप्राप्तविभाषयेतेनेहतचितस्यदोषः त्वणानास्मिति तस्याथित्वाभावेनमितबाभा

वादितिभावः अस्विट इति अनेन बध्या विटेपिरजपतिपत्तिलाइत्येवेति सूचइति अप्रेणत्तरजयोर्बकारविरजाः सम्स्याति
न्यादिप्रयोगान्तरगरमणं यथाश्रुतमेव अतएवभाष्यस्तगरमणाइति किमर्थं रेजयति वस्त्राणीति प्रत्युदाहृतमित्या
ङः जपादिरितिनेन मित्वाङ्गस्य ह्रस्वः चिनोतेस्तविस्फुरितिन्यात्वेपुगिकिंनस्यामित्वान्नह्रस्वः पतेनालव्योद्योयकारो
रदंभुसादिलिखितपरेनमतेवोध्यम् अभुस्फरादिति आत्वस्येणत्वनतेनस्यानिवत्वेनस्फावित्यस्याद्वित्वमितिभावः
साभ्यासस्येतिनिनोर्विशेषणत्वव्याख्यानात् तदाह साभ्यासस्यातिनेरिति अनेनोत्तरखण्डपवतद्व्यात्तत्त्वमि
तिसूत्रयतिपतेनप्राधान्यान्नकारविशेषणत्वेभ्याससहितनकोन्स्यर्थेरमागमेनरोपयपोवाभ्यासनिवृत्तानुम
ग्रहणान्नैस्यवस्थानेणत्वप्राणाणिनीतिस्याद्वित्वपाठत्तम् अतएवमहत्कृतिसूत्रेभाष्ये उक्तम् साभ्यासस्याद्वयो
रिष्टमिति आनतेरित्यनेनैनत्वसिद्धिः अभ्यासस्यानर्थकत्वाडन्तरात्कृत्सखावहितत्वात् अतएवेदंसूत्रम
भ्यासेनेति अभ्यासस्यानिमोक्तम् किंनुसाभ्यासस्यैवमकमितिनद्दोषायः परेनसाभ्यासानितिसंबंधो
मकारयोरुभयोणकारोभवतुइति वृत्तिकृद्विनानवाभ्यासस्यातिनेरित्यनेनैवाभिहितः तस्यानर्थक्यात् अनिते
रवयवस्यनमसंबंधिवयवस्यचेत्यर्थेननदनुवादकमेवेदं नघ्नार्थीभावेननविधायकमेवेदमभयोर्णकार
योः अतएवैकः पूर्वपरयोरितिसूत्रेभाष्ये उक्तम् उभयोग्रहणंसामं [illegible] ध्यीहावादेयोः अवक्तर

तिकैयदष्ट साभ्यासस्यातिति रूभौणकारौभवतइत्याह एवमेवयुक्तननभौनकाराइतिनइत्यस्यस्यषष्ठ्यन्तस्ये
वाधिकारेणाभयोरित्यापत्तेः अत्पूर्वस्येतिवत् उभौग्रहणंत्वाद्वेशाद्वयार्थम् अन्यथान्त्वेरत्यायुद्धवत्तद्
ग्रहणेवाभयोतिहृत्तोस्यात्व भावादेवपुनरग्रहणात्वादेशाद्वयताभौनस्यादित्याशः पूर्ववत्रासिद्धीयमद्वि
र्वेरस्तुमेः पूर्वगतेवद्विर्वेनासिद्धावपिक्वचितदप्रवृत्तिरीत्यापत्तार्थमिदमितिबोध्यम् निमित्तेसतीति
नद्धोपसर्गरेफः णोनमितणाविति विषयसप्तमी अत्रबोधनेषाहजेत्वातेनात्यदिक् धातोमाधवः ईष्टेने
विति ईष्टाति प्रकृत्यकप्रत्ययान्तधातोरित्यर्थः मचतयतः मनतच्चविति गमनाविरहात् ईष्टितेरामः स
त्वेनत्विरेभावात् अन्यत्रहित्वाभावान्नेतिदिक् इतिवार्थ इति नन्द्याइतिसूत्रेभाष्यस्पष्टमेतत् षकारस्य
त्तिरेफस्यनुनन्द्राइत्यनेनवारितमितिभावः द्वितीयस्येवेति अन्नादेर्द्वितीयस्येत्यनेन रेफस्यनुनन्द्राइति
निषेधइतिभावः इह्नोपभ्यामस्ताययाख्यानेनप्रयोगादितिबोध्यम् इतिपयन्तप्रक्रिया धा
तोः कर्षिकर्मणा इति कर्मादिकेवार्थद्वारकेधातोविशेषणमेवेषिकर्मवाचकादित्यर्थः ननुकर्तृ
त्वस्यक्रियातिहृपितत्वात्समानकर्तृकादित्युक्त्याक्रियावाचकाड्ढातोरेवभविष्यतिकिंधातुग्रहणेन
स्यतआह धातोरिति अनपेक्षकोकत्विनिकित्वेसार्थकम् कर्मणः किमिति प्रत्ययेवाच्ये शयातिय

६८
69

नेकर्मीकांत्तनयानदाकांत्तायांप्रत्यासत्याप्रकृत्यर्थकर्मिकायामेवविधानंभविष्यतीतिप्रश्नः प्रत्यासत्तिःसैवे
ड्डेत्येतदुत्तरम् समानाकर्त्तृकार्थिकमितिप्रत्यासत्तिमाश्रित्यप्रश्नः प्राग्वदेवोत्तरं रूढविदत्वत्वाद्गुरोरपिव्या
ख्यानात् विधेसर्वस्यग्रहणमित्याहुः सनिग्रहः चकारानुकर्षणार्थः प्रत्ययाद्युत्पत्तीत्यादौकित्वान्य
त्वादिरेवस्यात् किमाभावेनफ्कत्यस्याप्रवृत्तेः पकाजिन्येवजिजागरिष्यतिमनुपरत्वेनघनकत्वयोः
कृतयोभयभावोत्तस्मादनत्राह घञस्येतिकिरञ्च सनिग्रहेत्तिपकाचइतिचलिपेयेप्रामेववचने जिगतिषती
ति इटसनिवेत्यनमपवादस्मादयंवादनेप्रेमेठइति इदंहृन्नोस्यष्टभाष्यतनहृयपनेकलेनाह हलितिलमयंचंस्यते
ग्रेनशाहृसमीपवाची इकइत्यनुहृनेसष्ठ्याचिपरिणाम्यते नदाहक्लमीपादिति प्रियद्दनेइतिसनिकिवयजेः
मेघ्रमाशेणस्यादितिभावः जातिपरमितिहृत्त्वतान्याकांमेकानिकव्यक्तिपरमित्यर्थः सामीप्यमव्यवहित
पेवतिभावः अकनव्कोरितिसूत्रभाष्यफलनुहृनेकर्मकतावाह कलादोमतीतिजिगमिषतीति
णमेरिड्गिरीट मत्रहृमसर्वोपिगामिर्गदल्यनेव्याख्यानादितिभावः रलो॰नर्केकोत्पनः सेडितिवर्ततेनबन्का
सेवदमयी

हानुवर्त्तमानं सनोपि विशेषणं व्याख्यानात्तेनोपधेत्यजोर्वेतिवर्त्तते नेति निवृत्तं । सनि प्राप्तस्याभावेन निषेध
स्य वक्तुमशक्यत्वात्तदाह । इटो वेति । सामान्यापेक्षेति । सोच । इडीति सूत्रभाष्ये पदग्रमोणिमृदिति क
रोतीति तज्ज्ञापयति हि वेचनाद्धूस्वत्वं वली यद्इति उक्तत्वेन सामान्यापेक्षज्ञापकत्वमस्याचिंत्यं अत्र
ह लादेरितितु एषिलेत्यादौ नित्यं किंत्वाभावापकिंचरणविप्रतीत्यत्र नित्यत्वाद्धिलेऽभ्यासस्य नैर
र्थक्यादिटो नापत्तौरूपासिद्धिस्तस्माद्धुर्धांतरप्राप्याद्धिलस्य साप्यनित्यत्वाद्धयोरनित्ययोः परत्वादिडु
वाच्य इतितत्तोपि पूर्वं परत्वाद्गुणोनेष्टसिद्धेरिति दिक् । सनीवंत । अत्र सन्धातुस्तनादिर्भ्वादिश्च
विनिगमनाविरहात् । आपूरत । सनि मीमेत्यत्तोचडइति सनीति च सः सीत्यतःसीति चानुवर्त्तते ।
अवादिभिरचाविशेषणादनंत्ये सावकाशमीत्वं पूर्वविप्रतिषेधे न गिलोपो वाध इति नान्त्यस्य
लोचईत्वं यदि पूर्वविप्रतिषेधवार्त्तिके दीर्घग्रहणेनानेत्वग्रहणं तदानं त्यस्येति वक्तव्यं । अत्र
लो । अत्र सनि मीमेत्यादि सूत्रचतुष्टये लोपोऽभ्यासस्येत्यनुवर्तते इत्यर्थस्तत्फलितमाह ।
सनि मीत्यादि । यद्यपि सनि मीमेत्यादिविहितकार्ययुक्तेऽस्तति योऽभ्यासस्तस्येत्यर्थः अत्रात्तोत्यसे

ल॰श॰शे॰ ७१

७१

तिनोपतिष्ठतेनानर्थक इति निषेधात लोपस्याविकारत्वादनभ्यासविकार इत्यस्याप्रवृत्तिः यङ्लुक्॰ सनि
मीमेत्याद्यनुवृत्त्यैव सिद्धेऽत्र ग्रहणादत्राभ्यासत्वेन योनिर्दिष्टस्तस्य लोप इत्यर्थात् तदनुपस्थितिः दि
त्सतीति॰ पूर्वत्रासिद्धीयमद्विर्वचने इति चर्त्वे कृते तस्य शब्दस्य द्वित्वं॰ भ्रस्जो रोपधयो रमागमयोर्विकल्पात्र्यवलो
पि रूपाणि॰ उदोष्ठ्येति॰ अज्झनगमां सनीति दीर्घे कृते इति भावः। पिपविषतीति। द्विर्वचनेचीति युशब्दस्य
द्वित्वे ओः सुयण्णीत्वं ऊरोणिते रिडभावेऽज्झनेति दीर्घः इदं पक्षे विभाषेटो रिति वा डित्वं॰ चे
हादिकस्येति॰ हृस्वविशिष्टयोरुभयोरपि लाक्षणिकत्वादिति भावः। किन्वान्नगुण इति॰ गोच
इति शेषः॰ गोलोपेन गुणस्य बाध इत्यपि बोध्यं॰ आशंकायामिति॰ आशंकाविषयार्थप्रतिपाद
काद्धातोः स्वार्थे सनित्यर्थः॰ श्वा मुमूर्षतीति॰ वर्त्तमानसामीप्ये लट्॰ आशंका च प्रयोक्तृग
ताः सनि मीमा॰ सः सीत्यतः सीत्यनुवर्त्तते॰ मीशब्देन कृतदीर्घमीनातिमिनोत्योर्ग्रहणं व्या
ख्यानात्॰ शक ग्रहणेन च द्वयोर्ग्रहणं द्वयोरपि सानुबन्धकत्वात्॰ मुचोक॰ किन्वाद्गुणाप्राप्तौ वचनं॰
इट् सनि वा सनि ग्रह इत्यस्यापवादः॰ प्रकृतिप्रत्ययापत्तीति॰ युष्पयोगं ज्ञानाति पुण्येनायोजयतीत्ये शम॰

७१

तत्साधके पुष्पयोगे त्रीति वचने भाष्यकृत्कृतप्रत्याख्यानत्यनुवृत्तिर्ह्योपिकात्तत्र हि चज्ञोरिति घित्तिपरतः कु
त्वं अन्यथा कृत्स्नु किंनिमित्तापायपरिभाषयैव कुत्वनिवृत्तौ सिद्धायां किं तदनुवृत्त्येत्यन्यत्र विस्तरः वस्तु
तस्तैस्तत्परिभाषाभाव एव बोध्यते· पुस्फारयिषतीति· व्यवधानादोः पुयण्जीति न· सोतिरयणोरेव· एवका
रः छलोवधारणार्थः अन्यथाक्षरेणैवेति नियमः स्यात्तथा च तुष्टावेति न स्यात्· सानुबंधकषणीति ति
किंस्तु पूषइह· उपसर्गात्विति· स्तौतिण्योरिति नियमेन मध्येपवादन्यायव बलादादेशप्रत्यययोरिति
षत्वमेव बाध्यत इति भावः सोषुप्यते· सनिसोषुपिषत इत्यादौ न षत्वं प्रत्यासत्त्या सनियोभ्यासस्तस्मा
द्याप्राप्तिस्तस्या एव नियमेन व्यावृत्तिः अयं तु यङ्· निमित्तोभ्यासः· षतीषिषतीति· अत्राभ्यासात्तस्याज
नगमीति न दीर्घः सिषेचेत्यत्र पदाद्दित्ववारणायैकाचो द्वे इति सूत्रभाष्योक्तरीत्या द्वित्वनिष्पन्न
स्य उत्तरभागस्य प्रत्ययाधिकारस्थत्वाभावेनाप्रत्ययतया वाभ्यासांतसमुदायस्यांगत्वाभावात् श्रुति
पाति स्यपसत्वलस्येवेति इत्वंभवत्येसन्वत इत्यस्य ह्यंगावयवाभ्यासस्यात इत्त्वनिपरत इत्येवार्थ इत्यलं
धातूपसर्गकादेशनिष्पन्नेरिनिमित्तमत्राघ स्वंडेषत्वं न त्वभ्यासेरिनिमित्तं द्वि· प्रयोगत्वादभ्यास

ल॰श॰शे॰ ७२ 72

स्परस्परत्वं द्वितीयस्य तु न परस्परत्वं॰ शेषिकादिति॰ सति धायके भावे इदं॰ शेषाधिकारभवप्रत्ययान्तात्तद्धि
कारभवः सरूपो न॰ शालीय इति॰ शालायां भव इत्यर्थे॰ वाक्यमेवेत्येवकारेणाह एव व्यावर्त्यते तदाह॥ नेति
ति॰ अण्तु भवत्येवेति भावः॰ अणौंतादिति॰ भवाद्यर्थो णौंतादित्यर्थः॰ अत्र सारूप्यं शब्दतः एवं तेन ज्ञातार्थे
छांतास्त्रावार्थेपि छो नेत्याह॥ स्पष्टं चेदं ह्यौन च शाला शालीययोः पठति पियठि षत्योश्च ककालि को पस्थि
त्यभावात्कथं तत्तत्र त्ययांतेभ्यस्तत्तत्प्रत्ययप्राप्तिरिति निषेधो व्यर्थ इति वाच्यं॰ नित्यशब्दपक्षे धातुत्वेन
प्रातिपदिकत्वेन च सर्वानुवादेन विधि संभवात् अत एव त्वप्रत्ययान्तात्त्वप्रत्ययसिद्धिः सत्यभिधाने
तथा त्वार्थे सिद्ध सर्वैकशब्दादर्यातेरपुनरकस्य त्यभिधाने दृष्ट एव अन्यथा त्वनभिधानान्न सरूपः
सनेति॰ सारूप्यं शब्दतोर्थतो वा तेन समानार्थो विरूपः सरूपस्य न भिन्नार्थः समानाकारो नेत्यर्थः॰ दं
डिमती त्यत्र षष्ठीसप्तम्यर्थान्यतरवृत्तेः सप्तमीपक्षन्यतरार्थे प्रत्यये थेतः शब्दतश्च सरूपत्वाभावान्न दो
ष इति मतुप्सूत्रे चाकरे स्पष्टं तत्र हि मत्वर्थीयान्मतुबादेः प्रतिषेधो वक्तव्यः तं च पिबुवना समानहतो स
रूप इति वक्तव्यमित्युक्तं स नित्वर्थे सारूप्यमेव विशेषणसामर्थ्यात्॥ इति सनंतप्रक्रिया॥ भृशार्थे॰ रामः ७२

कार्त्स्न्ये नास्मिन्द्योत्य इति · वाच्यत्वे तु सन्नन्तेड् छायादेवतस्य विशिष्यत्वं स्यादिति भावः पुनरित्यादि धातोः क्रि
यासमभिहारवृत्तितां द्योतकं वोभूयते इति · क्रियासमभिहारे द्वे इति द्वित्वं तु न · क्रियासमभिहारे लोटोम
ध्यमपुरुषैकवचनस्य द्वे इति क्रियासमभिहारे लोडिति सूत्रे भाष्ये पाठेन तस्य लोड्विषयत्वात् किंच यङः
क्रियासमभिहारातिरिक्तार्थाभावेन यङेवतद्योतनसंभवात्तत्र लोटः स्वसमुच्चये विविधानादस्तित्वं द्यो
तने द्वित्वापेक्षा · भृशार्थे यङि तत्र पौनःपुन्यविवक्षायां तु भवत्येव नित्यवीप्सयोरिति द्वित्वं · नापद्यते इति
भृशं क्रियां संपादयन्पुनः पुनः पचतीत्यर्थो तत्पौनःपुन्ये यङि · तु नित्यवीप्सयोरिति द्वित्वं क्रिया
समभिहारे द्वे इत्यनेन पौनःपुन्येपि लोडन्तद्वित्वविधानेन पौनःपुन्यस्यैकेन चिद्योतनेसो च द्वित्वा
प्रवृत्तेर्ज्ञापनादित्यथा भृशार्थ इत्येवं वदेदिति निरूपितं द्वित्वं क्रियायामिति दिक् क्रियासमभिहा
रे धातोरेव वृत्तिसंभवात्स्वक्ति · धातोः किमिति · यङ्नीति · अनभिधानादिति भावः यङ्ङि · वौ धातोः
कयासमभिहारे धातोरेव वृत्तिसंभवात्स्वक्ति · धातोः किमिति · यङ्नीति · अनभिधानादिति भावः य
ङ्ङि · वो धातोः कर्मणा इत्यतो वेत्यनुवर्तते तेन धातुसंबंधे पक्षे यङोभावे भवति लुनीहि लुनीहीत्ये

वार्यल्लुनातीत्यादौ लोटः सिद्धिरिति भाष्ये स्पष्टं सूचिसूत्रि० सूत्रे एकाजूहलादिग्रहणाप्रत्याख्यानफलमिदं
सूत्रेस्यैकदेशानुवादः अशोशोभ्यतेरोचतेइत्यादावतिव्याप्तेः सूच्यादावव्याप्तेश्च तत्प्रत्याख्यानं यथास्थित
सूत्रन्यासेतु तेषामुपसंख्यानं कर्तव्यं स्यादिति स्पष्टं भाष्ये० यथान्यासेपि ऊर्णोतेर्नेवक्तव्यः नुवद्भावेन न
सिद्धेरिति चोक्तं तत्र अकितोभ्यासस्येति० अकितइत्यत्र बहुव्रीहिः किद्भिन्नाभ्यासस्येत्यर्थः अनंतरस्ये
ति न्यायेनैतत्प्रकरणस्थकिद्युतानामेव व्यावृत्तिरिति चाकूयतेइत्यादौ वंतूरंगला तुकिदीर्घो भवत्येवे
ति भाष्यवार्तिकयः भाष्योदाहरणादिति एतेन पङ्क्तौ द्वित्वं प्रतिकार्यित्वेनदीधेतिनिमित्तत्वायोगइत्यपास्तं०
अनेन भाष्योदाहरणेनार्थं प्रतिकार्यित्वं प्रतिनिमित्तत्वाभावस्येव नहि कार्यीत्यनेन बोधनादिति भावः नि
त्यग्रहणान वाक्यनिवृत्तये विग्रहे णायङ० तत्प्रतिपाद्यविशेषासंप्रत्ययान्नित्यग्रहणानर्थक्यमिति भाष्या
त् तस्मात्कौटिल्यपदान्वयव्यवधारणार्थं तदित्याह० कौटिल्य एवेति० इदं च वृत्त्यनुरोधेन धातोरेकाच
इति सूत्रे भाष्यं तत्र यो विग्रहेणा विशेषासंप्रत्ययान्नित्यग्रहणानर्थक्यं क्रियासमभिहारे च ने
ति भ्यो यङ्न भवितव्यमिति चेन विशेषासंप्रत्ययादित्यनुक्रष्यते० विग्रहे सौणा कुटिलं गच्छती

त्यतेन चंक्रम्यत इत्यर्थोऽसंप्रत्ययान्नित्यग्रहणसामर्थ्येन यत्र कुटिलं पंथानं गच्छतीत्येव संप्रत्ययात् ॥ क्रि
यासमभिहारे चेत्येतल्लुपसंदेत्येतद्विषयं तद्विषयस्यैव भाष्ये उदाहरणात्तस्मादृत्यर्थेभ्यः क्रियासमभिहा
रे यङ् भवत्येवमत्रोऽपि वक्ष्यमाणं यत्तित्यादिमतमसंगतं अत एव स्थावरप्रतिद्वंद्व्यर्थकं जंगमत्वमुक्तं सि
द्धं स्थितिशीलो हि स्थावरः तत्प्रतिद्वंद्वी भ्रमणशीलो हि जंगमः योगद्वये नित्यग्रहणाभावे न योगयोरित्य
स्यैवमेव व्याख्योचिता चकारस्यारंभाच्च यत्र तत्कृतं तत्र तत्प्रत्याख्याने उक्तस्य संबंधस्यासिद्धत्वाच्च भाव
गर्हायामेवेति इदमपि वृत्तिरित्येव यत्तु गत्यर्थादिभ्यः कौटिल्यभावगर्हयोर्विशेषविहितेन यङा
क्रियासमभिहारार्थे यङ् स तक्रकौण्डिन्यन्यायेन बाध्यस्तामपार्थ्यां वा तदर्थ्यस्य बाध इति तत्र त
स्य न्यायस्य विधेयविषयत्वादचरितार्थविषयत्वाच्च अत्र क्रियासमभिव्याहारादेर्यङ् द्योत्यत्वात्
द्वेर्धातोरित्यर्थे नाविधेयत्वं क्रियासमभिव्याहाराविवक्षायां चारितार्थ्यं चात एवोक्तं [illegible]ग
त्यर्थेका क्रियासमभिव्याहारे यङ् दाहृतो भाष्ये नैकान्तहत्तादिग्रहणं च प्रत्याख्यातं उत्तरस्य
परशब्दसामर्थ्यादभ्यासस्येत्यनुवर्तमाने पंचम्या विपरिणम्यते तदाहाभ्यासात्परस्येति अत्र

इतितत्परत्वंस्पष्टार्थमेवस्यात्तुकौलाघवाभावात्॰ ओ पङि॰ गिरतेरेवात्रग्रहणं व्याख्यानात्॰ संचेस्क्रीयत इति॰
नचसंस्कृइत्यस्यामवस्थायां द्वित्वनिमित्तपङः पूर्वमन्तरंगत्वात्सुट् इत्ततो यङि॰ द्वित्वात्परत्वाद्गुरुत्वाद्वा प्रावास्त्वा
यङि चेति गुणः स्यादिति वाच्यं स्तु द्वाभ्यां पूर्वं इति सूत्रभाष्यध्वनितेन गुणनिषेधे न संस्क्रियत इति वद् दोषात् तत्र हि
भाष्ये सर्वेतोन्तरंगतरकः सुटित्युक्ते केपदेन च ऋहुगुणयोस्तत्प्रतिषेधो वक्तव्य एवेत्युक्तं एतद्वचनादिदृशे विनि
रूपितश्रयानिर्देशफलमाहाकोती तादि॰ भ्वादेरेवकुङोत्र ग्रहणमिति भावः नीग्वचु॰ कसधातुभ्यो दिरेवालु
ग्विकरणत्वादिति केचित्॰ अकितइत्युक्तेरिति॰ नन्वजंताभ्यासस्य दीर्घ इत्यर्थेन तु अगादेकृते तत्त्वाभावा
न्नीकि विशेषाभावाद्दिकिरीग्विधानेनैव सिद्धेरिविधिसामर्थ्यादेव तद्भावसिद्धेः किमकिते हीत्वाभा
वान्नीकि विशेषाभावो इति यत्ने नेति चेन्न॰ अभ्यासविकारविधौ वैयधिकरण्यान्वयसाधनार्थत्वात् तेन
च्यतेः सन्निद्वित्वेंतरंगत्वात्तु किचिद्भ्यासते इत्यादावभ्यासद्धत्वे सिद्धिः नचैवमप्यपवादत्वात् नीगादिभि
र्दीर्घो वा धेयं यमेवत्तदिति वाच्यं अभ्यासविकारे बाधकानवाधंतद्भ्यर्थस्यायित्तापनात् तेषां सति संभ
वे युगपदेव प्रवृत्तिः योगापघाभ्यासे मवेत्क्रमेणैव॰ तत्रान्यत्र बाधकप्रवृत्त्युत्तरं बाध्यप्रवृत्त्यभावः अकृतेतुत॰

स्मिन्कृते विप्राप्तियोगं वा ध्वंस भवत्येवं यत्र तु बाधकप्रवृत्त्युत्तरं बाध्यस्य प्रवृत्त्ययोग्यता तत्र पूर्वं बाधस्य प्रवृत्तिरनंत
रं बाधकस्य प्रवृत्तिरिति । अत एव मीमांसते ते चीकरदित्याद्यावित्वकृते दीर्घः अनुस्वारे इदुतितस्य पदान्तत्वलाभस्य परस
वर्णः षष्ठीभाव इति । अत्र यङ्लीति विषयसप्तमीति पूर्वं षष्ठीभावे यत्पदिति वहुलं । यङ्लोपसंख्याना घङ् लुकि न
रीष्टत्वत इति । एवं चरीकृदुपधस्येत्यत्र ऋदुपधग्रहणं न कार्यं । हनिकौचेत्यत्र ऋत्वत इत्यस्यैवानुवृत्ते चरेत्यत्र
त्वपि न कार्यमिति केचित्तन्न । ऋदुपधग्रहणप्रत्याख्याने मानाभावात् अत एव तन्नकर्तव्यमिति भाष्ये नोक्तं हं
ग्रि कौचेत्यत्र ऋदुपधस्येत्यस्यानुवृत्त्यर्थं तस्यावश्यकत्वात् एवं चक्रुतश्चेत्यप्यावश्यकमेव अत एव तत्क्षस्य
स्यादेवपदलुकि न हृगादि । रीकु अनेन वार्त्तिकेन भवत्येवेति धिरे । ईघा । दीर्घोच्चारणमस्यज्ञा वित्पुनरर्थं । शा
शृप्यत इति यिति क्रितीत्यस्य विषयसप्तमीत्वादन्तरंगत्वेनापडिति हिलं संप्रत्ययादिग्पादेशेनेवडि । त्यपङ्कायि हि
त्ववाधस्यादिति वोध्यं ॥ इति यङ्लुक्प्रक्रिया ॥ यङोचि । अत्र चकारेण यस्य व्याख्यानात्तेन वहुलमित्यनुकृ
ष्यते अत एव पापयोरोस्त्यइत्यादौ न । फलान्तरमप्याह । चकारान्तं विनापीति वहुलग्रहणानुवृत्त्या वाक्यभे
देनातदर्थसिद्धिः सचर्करस्येवप्रयोगदर्शनान्नहि विषय एव वाहुलकादेव क्वचिल्लोकेपि वेभिदीति चेच्छि
दीतीति प्रयोगद्वयङि त्वस्येति । न चायमत्तुवं धनि दृश इति मंत्रमितव्यं । यदीयानुवंधनि दृशस्तत्कृति

कयङ्गतेतस्याप्रवृत्तिरित्यर्थेस्येवतिस्मिन्निर्दिष्टेसाहचर्यैर्णागीकाराल्लवःस्तिपाशपेत्यादिनिषेधस्यप्राप्त्यव
दर्शनाच्चेतिभावः॥४ यमेवलोके इतिहुश्नुवोरितिसूत्रस्थभाष्यस्वरसः॥ अन्तरङ्गत्वादिति॥ लुकूलात्वेत्यपि
बोध्यं॥ धातुत्वादिति॥ चर्करीतमित्यस्यादादौपाठात्भ्वादित्वेन भूवादिसूत्रेणेतिभावः॥५ पचहीति॥ त
स्यसूत्रस्यनियमार्थत्वमेवसिद्धान्त इतिभावः॥ अनुबन्धनिर्देशादिति॥ परेतुतन्निषेधाभावेपितेतिर
के इतिनिपातनेनान्येवात्मनेपदंयङ्लुगन्तेनान्येत्वेतिनियमान्नदोषःतिजेर्नेनिशानार्थेस्येदंरूपंत
स्यानित्यत्वन्तत्वेनतुततोयङ्॥ भावात्तस्मादर्थान्तरवृत्तेरनुदात्तेत्त्वपठितस्यास्मादेरिदंरूपं॥ अर्थान्तरेप्यनुदात्ते
त्त्वपाठेनानुदात्तेत्त्वमस्त्येव॥ अनुबन्धकरणसामर्थ्यात्तन्नतनादात्मनेपदमितिशुचित्वादिसूत्रस्थभाष्य
स्यपक्षमादिरूपार्थविशेषेप्यनुबन्धकरणसामर्थ्यादित्यर्थः केषुचिद्धातुष्वर्थसहितो धातुपाठः पार
शिनीय इतिभाष्यसंमतमितिनिरूपितं॥ अर्थान्तरवृत्तेरपिशुद्धत्वमेवेतिमतंतत्त्वयुक्तमेतद्भाष्यविरोधा
त् एवंचानुदात्तेत्त्वादात्मनेपदे सिद्धे तदुक्तनियमार्थे अत एवानुदात्तङित इत्यात्मनेपदंसिद्धमित्युक्त
मन्यथा ङित इत्यात्मनेपदंसिद्धमित्येववदेत् उकारीत्पाठ ङित्त्वमयुक्तस्यातचोपात्तेस्वरस्तन्मूलक एवा राम॰
७५

दादेशे च केरीत चेत्यस्य वस्येयदिभुपाठः शुपनादयो पिन· चकं रीतं चेत्यस्यापि शिष्यादौ पाठे नतत्र गणान्तर

प्रयुक्तस्याप्राप्तेरित्याहुः· यङ्‌लुगन्तादिति· तु कथमपि प्रत्ययलक्षणेन यङ्‌न्तान्यत्वं· छंदसि निपातनादिति· संको

चेमानाभावेन यङ्‌लुगन्त भूधातोः शब्दस्य वतत्रापि लोपे गुणाभाव इति नियम इति भावः· तत्र सूत्रे एका

ङ्ग्रहणं कर्तव्यमिति वार्त्तिकारंभे यङ्‌लुकि भाषायां सर्वत्र गुण एव लभ्यत इतीदं कफलत्वात्तत्प्रत्याख्या

नप्रकारे पिद्विधानियमस्यैवौचित्यं· अत एव वार्त्तिकारंभे भूदित्यसिद्धवद्भाषायां यङ्‌लुकि गुणा

पत्तिर्दोषत्वेन भाष्ये वोन्द्रावितेति दिक्· परे तु लोपे वेत्येव नियमः· बोभूत्विति यत्र छांदसेषु पाठस्तु पङ्‌·

लुक् श्छांदसत्वादेव· भाषायामस्य यङ्‌लुगन्तस्य प्रयोगस्त्वेन मानं· अत एव भाष्ये बोभूत्विति निय

मार्थत्रे त्वेव यङ्‌लुगन्तस्य गुणाभावो नान्यत्रेत्यो भवतीति लेटि उदाहृतमित्याहुः· न चेति· तस्य भू

त्वाभावादिति भावः॥ ग्रहणादिति· परे तु उत्तरखंडस्य भूत्वादिना भूस्तुवोरित्यस्यातदंतांगस्यत्वयोत्पत्त्या

त्तस्य निषेधस्य नियमः· द्विः प्रयोगत्वेपि विशिष्टानुपूर्वीभेदात्प्रकृतिग्रहणेन तत्तद्ग्रहणोपपादना

संभवात्· अत एव दयतेर्दिगि लिटीति सूत्रे भाष्ये अस्तेर्भू आदेशे यदि स्यात् तेन द्विर्वचनं कृते द्वित्वे सर्वोदेशो भू

भावः प्राप्नोति अथहि प्रयोगोद्विर्वचनंतदापरस्यमूभावे कृते पूर्वस्य अवर्णं प्राप्नोतीतीत्याहुः नित्यत्वादुगिति·
जुसिचेतिगुणापेक्षयेत्यर्थः· अपास्यादिति· नचदीर्घेसिविधानोरिति ह्रस्वमसिद्धं· हलोपसूत्रेठग्रहणे
नत्तरासूत्रेजघोरितिभाष्योदाहरणेनचपूर्वत्रासिद्धमितिसूत्रेपूर्वग्रहणेनैतत्सूत्राग्रहणावोधनात्· व
नादेवंब्रीतीतिनचनीगर्वज्ञित्यनुवंधनिर्देशेनयङ्· लुकिनीग्दुलैभूइतिवाच्यं· यङ्· लुकोरित्युतनुवृत्तिसा
मर्थ्येनादोषात् अतएवसनीस्रंसोदनीधंसइतिपेङोचिचेत्यत्रभाष्यप्रयुक्तं· नलोपस्तन· यङोलुकालोपा
तश्चिपाशपेत्यस्याअसत्वाच्चावनीवक्कइति· तसोङित्वान्नलोपः इकारोच्चारणसामर्थ्यान्नीगादेर्नगुणः·
समामान्यायेक्षेति· अन्यथैकाचूनिवंधनस्येवानित्यत्वस्यादितिभावः· आशिविनुवध्यादिति· दृंदृयतेरि
तिसूत्रस्यभाष्यविरुद्धमपिमाधवानुरोधेनोक्तं निरूपितंचेतत्तनादिशेषे· धातोर्विशेषणमिति एत
दपिअशास्त्रीयस्याप्यतिदेशइतिमते एतेनसाभ्यासत्वस्याशास्त्रीयत्वेनतासोनित्यानिट्त्ववदतिदे
शात्तभ्यत्वमित्यपास्तं असिद्धत्वेनेति त्रिपादीस्थत्वेनेतिभावः· वहिरंगत्वेनगुणोप्यसिद्धइतिचिंत्य
उद्देशेत्सुत्वेपोपूर्तेइत्यत्राभ्याससगुणोविप्रतिषेधसूत्रेभाष्येदृश्यते· नभवतीति· एतन्माधवानुसा

रेशा. न विघते किं घस्मिन्निति बहुव्रीहिगर्भबहुव्रीह्याश्रयणात् ज्ञाहे तीत्यादावकित इति दीर्घनिषेधो न तस्मा
मस्योदित्वव्यपदेशिवद्भावोपि न उत्वेनेति संप्रसारणेनेत्यर्थः इरनेति. एतदपि माधवानुरोधेन चार्कीगनु
वर्त्तनेत्यर्थः रीगिति. अववर्त्ते इति. इदं माधवानुरोधेन वस्तुतोस्यानभिधानं रक्षसेत्यत्र तकारप्रश्लेषेण तल्लो
पस्य प्राप्यासूत्रमते ऽप्राप्ताफलभेदापत्तेः चाकर्त्तीति. यङ् निमित्तो कृत्यांतरंगमपि करत इतीत्वं. य
ङोलुकालुप्तत्वात् उरदत्वे भवत्येवेति निरूपितं न लुमतेति सूत्रेन च चाकर्तीत्यत्राभ्यासहूस्वत्वे कर्त्तव्ये या
रीयत्वत इति रीग्रुवोरइत्यादि वाच्यं. अभ्यासऋकारमादाय ऋत्वतो हृस्वोक्तत्वत इति न परत्वे पक्षेन त
द्धृहणस्य वस्तुमशलात् नित्यत्वे नोरदित्यस्य प्रवृत्यात् भावाच्च. स्थानिवत्वं तु नापूर्वे विधित्वात् चाकर्ति
चाकीर्वेद् तुपक्रम्य किरतिं चकरीतांतय चतीत्यत्र योनेयत्. प्राप्तिइतमहं मन्ये प्रारब्धे स्तेन संग्रह इति
भाष्योक्तेः पचती तिलटः संज्ञाते नान्यत्रास्याप्रयोगः सूचितः आरतीति. व्रलोप इति दीर्घः न च दीर्घ यणः
स्थानिवत्वं अभ्यासकार्यं तदनव वा यवधाल वयवादेशस्य तत्प्रतिबंधकस्थानिवत्वेनेत्यर्थस्याभ्यासस्या
सवर्णो दत्यवर्णाग्रहणेन ज्ञापितत यां ऽक्षते दीर्घविधौ तन्निषेधाच्च. अरिप्रतीति. यणादेशस्य स्थानि

वलात्परत्वादिनातनः पूर्वमेव वाद्ययङ् एकाच इत्यनुवृत्तेरिति इदं हरदत्तानुरोधेन वक्तव्यं तोस्माद्यङ् लुकस्त्वपि
दीर्घस्य प्राप्तिरेव नास्ति । भाष्यकृता द्विर्वचनेऽभ्यासविशिष्टस्यैवांगत्वांगीकारेवयंतप्रत्ययग्रहणाय स्मादितिन्या
येनविशिष्टस्यैव यङ् । तत्वाद्धातुत्वांगीकारो नतु तस्यग्रहित्वमिति इआगपप्रत्यय स्यग्रहे विहितत्वाभावा
त् तदनुवृत्तिर्निष्फलेवेति तेनादिशेषे कार्यादिशेषे च निष्फलितमेवं च माधवस्य भाष्यविरुद्धत्वमपि चिंत्य
मिति दिक् । ज्वरत्वर । अत्रोपधायाश्चेति चकारेणावाक्यभेदाद्दादेशिभेदेनोठ्द्वयं तयोश्च सवर्णदीर्घे जू
रित्यादिसिद्धिः ऊठकरणवरमागमन्यायेन तस्मयो निवृत्तिरित्यन्ये एतद्वयमपि एकः पूर्वेत्यत्र भाष्ये स्प
ष्टं हल्लोपः वलिलोपेन सिद्धे वलोपविधानमूमेवाधनार्थं । नधातुलो । धातुलोप इति वहुव्रीहिस्तदाह
धात्वंशलोपेत्यादि । सर्वधातुलोपस्याभावादिति भावः स्पष्टं चेदं भाष्ये । गुणवृद्धी नेति । संनिहितेक्प
रिभाषानिषेधे तु दीधीवेवीटामित्यस्य वृद्धस्यादिति व्याख्यानात् गुणवृध्योरेव निषेध इति भावः नन्वेवं
हलादिः शेषस्यांगाधिकारस्थत्वेनांगाक्षिप्तप्रत्ययनिमित्तत्वाद्धिमेदेत्याद्यावनेन निषेधापत्तिरिति
चेन्न अभ्यासस्य धात्ववयवत्वादिदं च तेनादिशेषे निष्फलितं किंच पूर्वोरनाकावित्यादिसूत्रभाष्ये

कारीत्यात्र ज्वन्द्राव सिवासाप्यं नेमि निकलात् निरूपितं चैतन्न लुमतेति सूत्रे तत्सूत्रेस्दाहरणं लोलुवः पोपु
वइत्यादि धात्विति किं लूञ्लविता नद्भावे बहुव्रीहौ लक्षभेन नलोपनिमित्त इत्यर्थो लाभात् अत्रेदं हरणं
लोलुवः पोपुवइत्यादि धात्विति किं लुधे धातुक इति किं ती तोन्ते क्ङिति चेति सूत्रस्य भाष्यात्लेषां यङ्लुगं
तानामभाव एवेति लभ्यते तेनार्धधातुकग्रहणं स्पष्टत्वपावहुव्रीहिलाभार्थः विषयासंभवेनेति भावि
त्वान स्यैवशाद्वीप विषयस्यार्थत्वादित्याहुः पत्यपलक्षणं तु न नलुमतेति निषेधात् इतियङ्लुगन्तप्र
क्रिया ॥ सुपश्चा आत्मनः किं राज्ञः पुत्रमिच्छति पदविधित्वेन समर्थपरिभाषाप्रवृत्तये सुप इत्यभि
हितं पुत्रमिच्छतीत्यादेर्वाक्यान्माभूदिति च काम्यचि पूर्वस्य पदत्वाय च तत्रस्पष्टं इति अत्र वर्णातिसा
गस्येत्यर्थः नाव्यतीति गोमस्मानाक्षरं तांतादितिलेकदेशिमतं न सिद्धं तत्रतेएव नः को इति सू
त्रे वाच्यतीति भाष्ये प्रयुक्तं नः क्ये ककारोच्चारणं सामर्थ्य साधुः सामान्य इत्ये ह्याकृतये अन्यथा त
त्रैव विध्यर्थं स्यात् यस्य हल इति लोपमाशंक्याह संनिपातेति राजीयतीति नलोपः सुप्श्च रे तिनि
यमादीत्वेन लोपो नासिद्धः चिंत्यमिति पुत्रीयमिच्छतीत्यर्थेपि प्रकृतिवदनुकरणमित्यनेन धातुत्व

ल॰शा॰शे॰ मस्त्येवेति भावः· प्रामादिक इति· हलिचेत्यत्र धातोरित्यनुवृत्तेरिति भावः· कच् ज्योश्चेति· आवत्ययलोपो नेन क्रि
७७ यते· वाच्यतीति· अत्र संप्रसारणं न धातोः कार्यमुच्यमानमिति परिभाषणात्· सर्वप्रातिपदिकेभ्य इति·
77 वार्त्तिकस्य दध्यस्यति मधुस्यति दधिस्यति मधुस्यतीत्येवमर्थमिति शेषात् इदं दधिमधुशब्दविषयमेवेति
माधवः· काम्यच्च· धातुस्वरेणासिद्धेस्य चित्करणं चिन्त्यप्रयोजनं· कस्येत्संज्ञा तु न फलाभावात्· कर्त्तुः
क्यङ् धातोः कर्मण इत्यतो वेत्यनुवर्त्तते· कर्त्तुरिति क्यङि· धौर्येच मध्येत प्रपि सलोपविधौ योगपत्याष
ष्ठंतेन तत्तदंतविधिरिति वोध्यंते न र्हं सायत इत्यादौ सलोपो न· संनियोगशिष्ट इति· सान्तसंबंधि
क्यङेत्यर्थः· ते न क्यङि तदभावो नेति भावस्तदाह· स च व्यवस्थित इति इतरेषामिति· भाष्ये नाम
तप्रदर्शनेन विकल्पितात्ययोरिति भावः· सपत्नीवेति· एतन्मतं भस्याढ इत्यत्र निरूपितं· पुंवाय
त इति· वयोवाचिनो जातिकार्यं वैकल्पिकमिति जातेरस्त्रीति सूत्रे भाष्यस्य प्रमेते न जातेश्चेति नि
षेधादिदं रूपं दुर्लभमिति परास्तं· वा ग्रहणादिति अन्यथा विशेषविहितत्वात् क्षिपा क्यङे न वा
धाः स्यादिति भावः· एतान् अनुक्रम्य सर्वप्रातिपदिकेभ्य इत्येक इति भाष्योक्तेरस्यापि प्रातिपदि राम॰ ७७

कार्येवोत्पत्तिः सर्वप्रातिपदिकेभ्यो ऽस्य क्वपटु॰ आचारविधानेन वचनसामर्थ्याल्लब्धपर्यायत्वेवानुवादको वा शब्द इ
तिमाधवः । भूतपूर्वादृचीति । अत एव धातुभिरेव रूपसिद्धिमाशंक्यावगल्भां चक्रे इत्यादौ का ऽप्रत्यया दि
त्याम्प्रत्ययास्यादिति किंप्रकृतत इति भाष्य उक्तं । न चावगल्भिषते इत्यादावाचारक्विबंतात्सनि येथेष्टं ना
म धातुष्वितस्य प्रवृत्त्यर्थमिदं वार्त्तिकमावश्यकमिति वाच्यं नामधातुस्थस्यास्तुवंतपरतयात त्प्रकृतिकस्य
वास्य प्रवृत्तेः आचारक्विबंतेभ्यः सन्नेवानुत्पन्ने ऽस्य प्रकारस्यानुबंधत्वेन सांप्रतिकाने काऽभावस्यात्रा
भावात् वृत्तिसंभवादिति । न चाचारे ऽर्थे सर्वत्र्यनेनाजंतात्क्विपि श्रवगल्भतीत्यादिवारणायानुबंधा
संज्ञार्थं वचनमावश्यकमिति वाच्यं सर्वप्रातिपदिकेभ्य इत्यनेन क्विपि तथा प्रयोगे इष्टापत्तिरित्य
भिमानः । वस्तुतस्तु इदं सर्वं हरदत्तानुरोधेनेति ध्वनयन्नाह । पूर्ववार्त्तिकं त्वनुबंधासंगार्थमिति ।
आचारेऽजंतात्क्विपि श्रवगल्भतीति प्रयोगवारणाय सर्वत्र नक्विबनुवादे नानुदात्तसंगपर्यवोध
त इत्यर्थः अत्र चातिरिक्तोकारः पररूपेण श्लिष्टो ऽनुनासिक आस उपेत इत्यनेनानुप्रयुक्तस्यामः सि
द्धिरिति भावः हरदत्तानुसारेणाह प्रत्ययग्रहणमपनीयेति । वस्तुतस्तदयनर्येनमानाभिति निर्वादि

ल·श·शे·
७८
78

तंप्राकू एवंचप्रत्ययांतत्वादेवात्राम्‌सिद्धिर्बोध्या किंच तदपनयवादिना एकाजूम्योनभिधानात्किवनुत्पत्तिरेववा
च्या· अन्यथा सूत्रवार्त्तिकयोः फलभेदापत्तेः यत्र भिन्नफलार्थमेवोत्तरस्य प्रवृत्तिस्तत्र फलभेदेपि प्रत्याख्या
नमस्कचात्रतया सत्पनेकाजूग्रहणांचुलं प्राघष्ठेमितिवदेकाच्यावृत्त्यर्थमित्यपिवदेत् किंचैवं सति नर
क्कादेरित्यादौ अनर्थकः प्रतिषेधो निष्ठायामनिटः कुत्ववचनादितिवत् प्रत्ययादित्यनर्थकं अनेकाच आभि
धानादितिवदेत् इति दिक्· तत्र हरदत्तोक्तमंगीकृत्य माधवेनोक्तं प्रक्रियाक्रममाह· अतो गुणेन आदेरि
त्यादि· अतो लोपमत आदेरिति दीर्घं च बाधित्वात् रंगत्वात् पूर्वं रूपं वा एतो दागमितितु न्यातित्यत्वादिति मा
धवाभिप्रायः। दीर्घ इति· परत्वादतो लोपं बाधित्वात् पूर्वी तत्वेनाभ्यासत्वादित्यभिप्रायः मा लातीति आति
नायः आतो धातोरिति न्यासयोःफलैक्यापात्तेभ्य आचारक्विवेव नेत्यपरे· ङीसाहचर्यादिति· ईकारस्
पठंतान्त्रिस्पोरसंभवइतिभावः· कैयटादयइति· उदंच गोशब्दादाचारक्विपि अगवीदित्युपक्रम्येकोगुणो
तिसूत्रे कैयटेनोक्तमूप्रत्राम्रुचिवीजंतु नवैसं ध्यक्षरमंत्यमस्तीति इको गुणेति वदत्रजेतिसूत्रस्थाभाष्य
प्रामाण्यादेतः अपनि आदेच इत्यादिसूत्रस्थभाष्यप्रामाण्यादेङं तेभ्य आचारक्वियोभाव इति· स्रुगस्रुगि

रामः०
७८

धायकवार्त्तिकोक्तमाधवरीत्याऽस्यापि वार्त्तिकस्याश्वतिगदिमतीत्येव प्रयोक्तमिति वाक्यशेषात्तन्मात्रविषयत्वेनावस्येति कश्चित्
इदामतीति हलन्तेऽप्यत्राचारक्विबन्तात्तीति ह्रस्वनघापदृति सूत्रे भाष्ये स्पष्टमित्यपरे। यथीनतीति। इदं माधवानुसारेणा
क्विबंगीकारे विषये नत्नीत्वितु युक्तं ह्रस्वनुमिति नियमेन दीर्घप्राप्तेः न च नियमस्य सजातीयापेक्षत्वात् ह्रस्वानन्तर्ये एव नि
यमफलं निषेधप्रवृत्तिरिति वाच्यं। द्वन्द्वः स्त्रीत्वत्राप्तीत्याद्यसिद्ध्यापत्तेरित्यपरे। हरदत्तेन त्वत्रास्वरसं चिह्नं दर्शयति।
माधवइतिश्च नाकरमेवेति अत्र यदुक्तं तदुक्तं। अत्रहारिभ्यो। अत्रशादिराकृतिगणाः सुमनसादयोवहुव्रीहयश्च
भूतत अत्रावग्रहणं कर्त्तव्यमिति वार्त्तिकं तदाहाभूतेत्यादि। वार्त्तिकान्यथासिद्धिमाहाश्चेरिति। लोपश्चेतिचोन्वाच
येन एवमत्रशब्दग्रहणं चरितार्थं। अत्रशादइति। अत्रशालोकादित्यर्थः कैयटेन तथापागतः प्रातिपदिकमिति न तु धातुस्त
थासतिभाष्योक्तवक्ष्यमाणज्ञापकानुपपत्तिरिति भावः उपसर्गस्यापि प्रयोगभेदेनोपसर्गसमानाकारत्वं
बोध्यं चिकीर्षितइति। पृथक्करणेन समासाभावकल्पनेपि तद्विषये क्यजादिप्रत्ययविधायके लक्षणे सत्वं
तादित्वं शेयस्माद्विहितस्तदादीत्यंशाप्रवृत्त्यानदोषः यस्माद्विहितइत्यनेनाधिकव्यावृत्तिरेव न तु न्यूनव्यावृ
त्तिरिति तत्वं। पृथक्कृक्रियत इति तेन जातसमासाभावः कल्प्यते अत एव सुमनायतेत्यादौ पुनः कांतेन समा
सेत्यपसिद्धिः तदुक्तं अत्रशादिष्विति सूत्रे भाष्ये संग्रामयतेरेवसोपसर्गान्नान्यस्मात्सोपसर्गादिति। अ

ल·श·शे·
७९
79

यतइति।उत्तरयदात्यार्थेक्येनेतिशेषः आदेशेनेति· एकादेशरूपेणेत्यर्थः अत एव स्वाश्रश्रुवत्सम्यचिचदितिमाधवो
दाहृतं संगच्छते· अवगल्भेति· स्वोत्तरभागेन धातुसंज्ञानिमित्तप्रत्ययप्रकृतिभूतेनैकदेशधातुना समर्थमवादि
कं तद्घटिततत्घटितविशिष्टार्थेनापि त्वांतेन सहसमर्थतयाकुगतीतिसूत्रेण समासे क्तोत्यवादेशः प्रकृत्ये
कदेशद्वारकमेव चकृत्सु सर्वत्र सामर्थ्यमिति दिक्· चशब्देनेति· एवं च विनिगमनाविरहेणावाध्यसामा
न्यचिंतया सर्वबाधकत्वं तस्येति भावः अन्यथा पुरस्तादपवादान्यायेनोमाङ्गोरित्यस्यैव बाधः स्यात्तत्स्तीत्यस्य
तिवोध्यं· अत्राद्गेरिति· अत एव भाष्ये लोहितभिन्ना नालोहितादिगणोपलक्षमानानां म्हशादिपाठे नित्यात्म
नेपदमेव प्रयोक्तकमुक्तं न त्वभूततद्भावविषयतालाभोपीति भावः असंभवादिति· अनुकरणाड्डाज्वि
धानेनानुकरणात्वभंगापत्त्यात्तत्र तदसंभवतीति भावः तस्य आदिशब्दस्य· भृशादिष्विति नित्यमात्मनेप
दस्यैवतेभ्यदृष्टेरिति भावः तस्यापीतिककारस्यापीत्यर्थः योगं विनापीति तदर्थसत्तामात्रेणेत्यर्थः एवं च त
दर्थविवक्षयाड्डाचि कृते ततस्तदर्थैक्यमिति भावः तम्हाख्येति· उक्तभाष्येत्यर्थः कष्टाय क्रमणामुत्साहः
कष्टायत इत्युक्त्यागमनाद्यप्रतीतावपि कष्टविषयकोत्साहप्रतीतेस्तदाहोत्साहेर्थे इति· पापं कर्त्तुमिति·

श०म०
७९

अंतरंगत्वात्कर्त्तुमित्यस्यैवांतर्भावः विग्रहे कर्त्तुमित्यध्याहारेण क्रियार्थोपपदस्येति चतुर्थी वृत्तिसर्गे तितत्तु· वृ
त्तिविषय इति· न च तत्रैव तत्वे कस्यापक्रमत इति विग्रहोनुचितो स्वपदविग्रहस्यैवोचित्यादिति वाच्यं· अस्य
सत्राद्यभिप्रायेणाप्रवृत्तेः अत एव भाष्ये कस्यायकामतीति विग्रहं प्रदर्श्य सत्रादिषु सन्नदर्शितः· पापंचि
कीर्षतीति· उत्पादनायाः कृत्रर्थत्वाद्द्वितीया भाष्ये तु कामतीति परस्मैपदं प्रयुञ्जन्क्रमणं गमनमेव· पापो
द्देश्यकेन हि तेन तद्विषयकोत्साहो गम्यते इति क्रमेरुत्साहार्थत्वाभावः करणवच्चिकीर्षायामित्यस्य हि तस्या
गम्यायामित्यर्थ इति तस्याशयः· कर्मणः इति षष्ठी प्रतिपादकत्वं षष्ठ्यर्थः कर्मप्रतिपादकरोमंथतपोभ्यामिति
वाच्योर्थः फलितमाह कर्मभ्यामिति· वर्त्तीति रूपत्वाद्धात्वर्थनिर्देशे इक्· केयर इति। उक्तं च भाष्ये उद्गी
र्णस्य निगीर्णस्य वा मंथो रोमंथ इति· उद्गीर्णं उदरादुपर्याकृष्टं अन्नं वगीर्णं सम्यातन्त्रिगतं मंथश्चर्वे
णामिति तदर्थः शब्दवैर· कर्मणः इति वर्त्तते करणमत्र क्रियाव्याख्यानात् इति न्यास इति भाष्यानास्त्व
मत्राह चिः सुखादिभ्यः· वेदनाकर्त्तृसंबंधिसुखादिप्रतिपादकेभ्यः सुखादिभ्य इति वाच्योर्थः
फलितमाह· वेदनेत्यादिः पूजायामित्यादि नमस्त्रादिभ्यः कर्मणान्वेति· चित्रङो ङित्वमवयवेऽ

चरितार्थमिति क्यजंतात्तङ् नो. युक्तादिति. ह्रस्वादिभ्य इति च भाष्येन दर्शयितेर्संव स्वयतीति. वस्त्रैः समाच्छादयती
त्यर्थः. परत्वाद्वृद्धाविति. न च नित्यो लोपः शब्दांतरप्राप्त्यानित्यत्वात् व्यक्तिभेदमात्रेणाच शब्दांत
रप्राप्तिग्रहणात्. रंधयतीत्यत्र तु तस्यानित्यत्वान्न दोषः अत्र यद्वक्तव्यं तदुक्तं चुरादौ. सापेक्षेभ्योपी
ति. स्पष्टं चेदं स्वपक्षात्मने इत्यत्र कैयटे। गमकत्वान्मुंडयति माणवकमित्यत्र णिज् भवति मत्तु ना ग
मकत्वादित्यपि तत्र भाष्ये स्पष्टं तदाप्रपंचार्थमेव मुंडादिग्रहणं माणवकं मुंडं करोतीत्यत्र वाक्ये कर्मसा
मानाधिकरण्यान्माणवकस्य कर्मत्वं वृत्तौ तु मौंड्यरूपफलाश्रयत्वात्तद्बोध्यं. सत्यापयतीति. आयुग्वि
धान सामर्थ्यादिलोपो न. एवं तु इष्टानभिधानं. अत एव गोरायुङिति भाष्यं संगच्छते. घ इति. कर्मे
रणपर्यंतनिपातनात् कुत्वाभावः कर्तरि णिजंतादुत्पविकल्कुशब्दात्यनेय. एनयतीति. न चात्र परत्वादिलोपः
स्यात् अतिदिश्यमानकार्याणामुपदेशदेशस्यैव देशत्वांगीकारादिति वाच्यं भस्याढे इत्यस्य प्रत्ययोत्पत्तेः पूर्वं
प्रवृत्त्यांतरंगत्वात् तदतिदेशसामर्थ्याच्च न च युवत्वस्यासिद्धत्वादिलोपो दुर्लभः आभीयासिद्धत्वस्यानित्य
त्वात् अत एव टेरिति सूत्रे भाष्ये एनयति श्येतयतीत्युदाहृतं दृष्टनिष्ठं हसवत्त लोपप्रवृत्ते लौकेन तदतिदे
शद् इति युवन्द्वावादिषु टलोपो नोक्तो मूलेनाप्युदाहृतः अत एव मातयति भ्रातयतीत्युदाहृतं रक्तत र शम०
८०

ति सूत्रे भाष्ये। प्रथयतीति। रभावटिलोपावत्र। स्वसिद्धत्वादिति द्वित्वेनदसिद्धत्वेन हकारघटितत्वुध्याद्वित्वे
भ्यासे प्रचुत्वसिद्धिः इदं पूर्वत्रासिद्धमिति सूत्रे वृत्तौ गत्यस्येति। नदनित्यत्वं उभौ साभ्यासस्येति लिंगाशाणाल
मात्रविषयमिति तन्मते भावः। ओऽड्डिढदिति द्वित्वे कृते तदाश्रयस्य कार्यान्तरे कर्त्तव्येऽप्यसिद्धत्वनिषेधान्नाभ्या
से चुत्वादीति भावः। शर्पूर्वा इति सूत्रे कैयटे चोजठदिति प्रयोगो दृश्यते इत्यनित्यत्वमन्यविषयेपीतिस्र
त्राह चिः। स प्रयोगो विचिन्त्य इत्यन्ये। ऊनपत्तावुक्तमिति तत्रासंगतमिति तत्रैवोक्तं कैयटेऽभ्यासे
कारपाठो लेखकप्रमादात् पूर्वत्रासिद्धमिति सूत्रस्य वृत्तिग्रन्थोपि विचिन्त्य एव। तत्र हि ऊठमाख्यत् औजढ
दित्युक्ता औजिढदिति तु ऊठि शतृस्य तु कं। प्रकृत्यैकाजिति निनाति दिष्ठ टिलोपो न। यस्येति लोपस्य
न। इष्ठवन्नितस्मात् इष्ठवत्वेनातिदेशात् नेति दे शात् एकाजिति सिद्धे प्रकृत्येत्युक्त्यातस्यापि वा धात्व। वृद्धिप्रका
विति। प्राययतीति भाष्यप्रयोगात् दधौ जौणातीति सूत्रस्थ न स्नौत्यत उपधायाइत्यैकोच्येत किमर्थो यो
गविभागः स एवार्थ इति भाष्यं तु प्रयोजनोपलक्षणमिति भावः। अन्तरंगत्वादिति वाणापरिभाषा
अनित्यत्वादप्रवृत्तिरिति भावः। अनित्यत्वाश्रयणो दृढतरमानाभावात् व्याश्रये पीयायत्वाद्दोत

ल॰ श॰ शे॰
८१
81

स्वकृते श्वाघमेवन्याप्प्रमिति चेत्॰ अन्यथासिद्धीनि। एवं हि तत्र भाष्यविरोधमेयः स्तु प्रकृतिभावे किमुदाहरणं त्रे
ष्ठ इति प्रारीनाम सिद्धत्वान्न भविष्यति इदं तर्हि श्रेष्ठः अकारो ह्युच्चारणसामर्थ्यान्न भविष्यति विन्मतोर्लुग ये
न हि स्रग्वितमः स्रजिष्ठ इति नाप्राप्ते टिलोपे लुकश्चारंभे न तु काटिलोपवाधात् तद्विषये तदभावादिति अ
सिद्धत्वप्रत्याख्यानेन तु परत्वात् प्रादिवुटिलोपं वाधित्वा कृते षु स कृत् गति न्यायेन टिलोपाप्राप्तिर्वोध्या अ
त एव श्रेष्ठ इत्यत्रोच्चारणसामर्थ्यादिति नोक्तं किं च विन्मतोर्लुगि वप्रादयः आदय श्च नाप्राप्ते टिलोपे आ
रभ्यमाणास्तद्बाधका इति तन्निर्णयेन टिलोप इत्यल्पमेव सर्वेषां धारणमतस्त्व कनिष्ठ इत्यादौ टेरिति न
न स्तद्धितइत्यपि न॰ अन उच्चारणसामर्थ्यात्॰ सर्वादेशत्वे केत्यादेशे नापि सिद्धं न्वे छत्ये छयो ए घे
समाधाने एकदेशिनः परे तु किमुदाहरणमिति प्रश्ने परोक्तोदाहरणं नामन्यथासिद्धिं प्रदर्श्य पोदाहरणा
न्तरानुक्तेरत्रोदाहरणाभावेऽप्यातिदैशिकफलार्थमात्रे सत्रारंभस्यादर्शनाच्च प्रत्याख्याने एवं च पूर्वेति
सूत्रे भाष्ये प्रकृतिभावस्याल्लोपो न इत्येतद्बाधकतायाश्च प्रयुक्तत्वेन नैकाजित्येव सिद्धे प्रकृतिग्रहणेन प्र
कृतिभावविधायकेन्यायात् प्रकृतेर्बोधनेन च न स्तद्धित इत्यस्यापि प्रकृतिभावो न्याय्य इति टिलोपापि दुर्ल
भः यत्तु प्रकृत्यैकाजिति सूत्रे भाष्ये पदस्येत्यादौ प्रकृतिभाव इत्युक्तं तन्नादिशब्दः प्रकारे लोपत्वे न च सा

राम॰
८१

दृश्यमिति न तद्विरोधः एवं च वृद्धौ श्वानयतीति प्राहुः शुनयतीति न नु संप्रसारणे पूर्वत्वं बाधित्वा वाणो दीर्घ
मिति येन टिलोपे दृढं रूपं दुर्लभमिति वाच्यं शुश्रुवतुरित्यादौ संप्रसारणे कृते तेन न्यायेनैरने काचश्रुतिय
णोरूपासिद्धापूर्वरूपविषये नित्यत्वेनान्यत्वा वा प्रवृत्तेरिति भावः आहुरिति अत्रारुचिवीजं तु प्रह्मवत्सु
हृदिश्वनिमत्तोल्लुकि टेरित्यस्याप्रवृत्तौ न तद्धितद्रूपस्य प्रवृत्तेर्दृष्टत्वेन श्वनितस्यादृष्टत्वादित्यसंगतं· किंच
प्रह्मिश्वइत्यादावित्यप्यसंगतं तथा हि केवलाद्गुणवचनत्वेन श्वनेवदुर्लभः मत्वं तादृश्वनिमत्तो लुकि
तेन टेरित्यस्य प्रवृत्तिमन्तवाधतेनत्तु गुप्तरं तद्प्रवृत्त्यापरत्वादित्यस्यासंगतिः किंच नस्तद्धित इत्यस्य टे
रित्यपेक्षया परत्वमित्यर्थस्य प्रकृत्यैकाजिति सूत्रे भाष्ये ध्वनितत्तयापि तद्युक्तमिति· नैत्येकदृति
टिलोपे नासोलोपे च वस्त्वं दुर्लभं राजकीयमित्यादावप्यवत्· एवं च संप्रसारणाप्राप्तेरेवाभावे नांगवृ
त्त परिभाषोपन्यासो वृथेति अत्राहरुचिवीजं तत्परिभाषायास्त्र भावाच्चेति इदमेवाभिमतद्वये स्रुचि
वीजं रूपं तु विद्धयतीत्येव सत्यभिधाने· प्रतीचयतीति· अचइत्यल्लोपे चाविति रीर्घः इको सवर्णा
इति। नसमास इति तु न· पृथक्करणे न समासनिवृत्ते रक्तत्वात् सम्यचिवदिति· सम्पादिष्णा स

ल.शु.शे. ८२ ४२

स्थानिवत्त्वेनोपसर्गत्वात्स्यपृथक्करणं। पृथक्करणेन समासस्य निवृत्तेरुत्तरपदपरत्वाभावे पर्यन्तरङ्गत्वाल्लुगतः
सम्प्रादेशो न निवर्त्तते। समीचयतीत्यादौ च कारस्यावतित्वं तु स्थानिवत्त्वेन बोध्यं। अचेरिति निर्देशोनुप
सर्गत्वेन पृथक्करणाभावे नानेकाच्त्वात्प्रकृतिभावाप्राप्तेरिति भावः। बहिरङ्गत्वेनासिद्धत्वादिति बहि
र्भूतशिनिमित्तकत्वादिति भावः। तिरसस्तिर्य्यलोप इत्यत्रानन्तरत्वेनाच इति लोपस्यैव प्रतियोगित्वेन
ग्रहणादिलोपे पिति रिः स्थानिवत्त्वेन तिरेरच्परत्वेनाच्पान्तांभमात्रे इति टिलोपेन नष्टत्वादिति तद्
ति सूत्रे भाष्ये स्यपाठेन परस्याव्धावाधात्। अतएव वपसेति लोपेनास्य तेन न सर्वेटिलोपवारणोपि भा
ष्ये वोक्तामम्युच्चयमुक्तिमाह। सिद्धवदिति। अङ्गवृत्ते इति वृद्धिस्तु भवत्येव तस्या अनित्यत्वादिति भावः।
अङ्गवृत्तपरिभाषायाः फलाभाव इतीदं चिन्त्यं निरूपितं चैतद्घुष्मत्प्रकरणे देवद्र्यञ्चमिति विष्वग्देवयो
रित्यद्र्यादेशः स्यपतीति। अत्रापानामिति टिलोपोतिदेशेन भत्वात् संज्ञापूर्वकत्वादिति णाविस्यां गे
नाजिदेशो न विनोल्लुकः सत्वादङ्गवृत्तपरिभाषया न वृद्धिरिति कैयटः। अतएवेटरिति सूत्रेद व
यतीत्यत्र वृद्धिर्नोक्ता भाष्ये परे तु एतस्मादप्रयोगात्प्रायपतीति भाष्यप्रयोगाच्च लक्ष्यविरोध

राम० ८२

विषयकेस्मिन्नुवाक्येऽभावातिदेशोपि तेनेष्टसिद्धिरुदाहरणमात्रमिति भाष्योक्तत्वात् तदनुक्तमसंज्ञातिदेश
वत् क्वचिद्रूपाण्यतिदेशो बाधकाभावात् एतेन संज्ञापूर्वकविधेरनित्यत्वं न भाष्यसंमतमंगकार्यैरित्यपि नल
क्षणसाधकं तत्रतत्र ज्ञापकमुक्त्वा किं प्रयोजनं पिवेर्गुणप्रतिषेधः प्रयोजनमित्येवोक्तं तत्त्वं विधिलक्षणसि
द्धिसत्प्रयोजनत्वेनोक्तेति तेषां प्रकारान्तरेण सिद्धेर्भाष्याभिप्रेतत्वात् इत्याहुः श्रीमतीमिति शिचि वृद्धत्वेप
तो लुक् अशि श्रयदिति णाव च आदेशो नेति श्री शाहसद्धिलेत्रयस्खंडेऽध्यायोः कृतयोनेत्रघटि ता
नित्यत्वेन नाल्लोपीति निषेधाभावेऽपि स्वत्वमिति भावः एतच्च माधवानुरोधेन सत्यभिधानेऽशश्रायदि
ति उचितमित्यन्ये यवयतीति स्थूलदूरेत्यिणादिलोपगुणौ अत्र गृहन्तपरिभाषया नन्तत्वाभावेन वा संप्र
सारणं न ज्ञापयति नेदयति साधयतीति माधवानुरोधेन पांचमिकयोर्विन्मतोर्लुक् कनोरेव भा
ष्यकृता इष्टवद्भावे नांगीकारादित्युक्तं कनयतीति अत्रोपधावृद्धिर्न प्रज्ञयतीतिवत् ऽउपसर्गस्व
ति तत्स्थकूकरणे नविशिष्टस्य प्रातिपदिकत्वाभावान्न जातिदेशाप्रवृत्तिरिति भावः नारूतिनामधा
तुप्रक्रिया एरम्योधातुस्यइति धातोरित्यनुवृत्तिसामर्थ्यात् स्वादिपाठे न बाधातुत्वमिति भावः॥ इ

ल० श० शे० कंड्वादिराकृतिगणा इति गणरत्नमहोदधौ तेन रैयति धवलयतीत्यादि सुपूधातुवृत्तौ स्पष्टं इति कंड्वादयः प्रथमै
८३ काच इति· अजादेर्द्वितीयस्येत्यस्यापवादलक्षणमेतत् तृतीयस्येति· एकाच इत्यर्थः एकाच इत्यनुवृत्तेः कंड्वा
४३ देरित्यस्य न द्व घटितयगंतस्येत्यर्थः भाष्ये कंडूवि पिबतीति पिशब्दद्वित्वकरणात् नामधातुष्विति· नाम
घटितधातुष्वित्यर्थः नामशब्देन सुवंतं तेषु विषमानानां त्रयाणामेकाचां यथेष्टमित्यर्थः अत एव पुपु
त्रीयिषतीत्याद्युदाहृतं भाष्ये· अतो पि शंपता च तु· नास्य प्रवृत्तिः त्रयाणामिति एकाचो द्वे अजादेः कंड्वादेरित्य
त्र पूर्वत्रयाणामेवोपस्थितेः पूर्वत्र वाध्यबाधकभावाभावस्य निर्णयात् त्रयाणां न युगपद्द्वित्वं न चाजादेर्द्विती
यतृतीययोः पर्यायेणान्येषां तु त्रयाणां पर्यायेण द्वित्वमिति बोध्यं· एषां वचनानां नन्द्रा इति सूत्रे पाठेन
तद्वदेवाधिकारत्वाद् विशेषेण प्रवृत्तेर्यथाभिधानं प्रवृत्तिरित्याहुः नदराणामिति तेषां मध्ये आदिभूता
दच परस्यैवेत्यर्थः इ श्वद्भिपिशब्दयोरिति· न च द्विर्वचनेचीत्यस्य प्राप्तनिषेधात् घशब्दस्य द्वित्वप्राप्त्यापि शब्द
त्वसंभवः न टभापीपञ्जंजनानीति न्यायेन ककार सकारसहितस्य द्वित्वप्राप्त्या कार्यानुभवेन न नहि कार्ये
ति निषेधेन द्विर्वचनेचीत्यस्याप्रवृत्तेः न च पिस्शब्दो न नामधात्ववयवः नामधातुघटकवर्णसंवद्धे राम० ८३

काचामित्यर्थेनादोषात् अत एव पुत्रीयियिषतीति भाष्ये उदाहृतं। यिशब्दे द्वित्वे पि सनन्तवयवे कारस्य द्वित्वानुभ
वेन द्वित्वनिमित्तत्वायोगोत्स्पवेत्यनोस्थयामूल्लेपि शब्दे न्ये वोक्तं च दिद्रीयिषतीति। इदं माधवानुरोधेनेत्यादि
भूतादच: परस्येति भाष्ये संमतेत्यर्थे तु चिन्त्यमिदं। विचारयिषये इत्यर्थे संभवेपि न कृत्रिमकर्मग्रहणमुक्तार्थे
स्यौचित्यात्। तेन देवदत्तस्वामिकं धान्यं स्वद्रव्यं दत्वा लवनेन स्वीकरोतीत्याद्यर्थे के देवदत्तस्य धान्यं व्यतिलु
नातीत्यादौ नेन। यद्यपि साध्यस्वभावक्रियाणां परिवर्त्तनरूपो व्यतीहारोनेन संभवति प्रतिदानं व्यतीहार इत्ये
कोर्थ इति घसंज्ञासूत्रे कैयटात् उदीचां माङो व्यतीहारे इति सूत्रोदाहरणास्यायमित्यपाचत इत्यस्य पा
चित्वावस्थाशि परिवर्त्तयतीत्यर्थे इति कैयटाच्च स्वस्वकृदानपूर्वकं परवस्त्वंगीकारो हि परिवर्त्तनं अत ए
व कर्मव्यतिहार: क्रियाविनिमय इति व्याख्यातमभियुक्तै: एतेनान्यक्रियापात्रन्येन करणं व्यतिहा
र इत्यपास्तं अत एवान्यक्रियामन्य: करोतीतरक्रियामितर इति कर्मव्यतिहारं जयमंगलाकार: प्रादर्श
यत्। तथापि तत्साध्यत्वेन ज्ञातक्रियाणां साध्यसाधनभावव्यत्यास: स: परस्परकरणं च स: यथा संप्र
हृते राजान इतीति कैयट: तत्र वर्त्तमानाद्धातो: कर्त्तरीत्यर्थे विनि। गमनाविरहात्तत्कर्त्तृमात्रेत्वं योचि

न द्विवचनबहुवचनांतान्येवास्योदाहरणानि। न त्वेकवचनांतानि अत एव भाष्ये क्वाप्येकवचनांतानि नोदा
हृतानि किं त्वेवं च व्यतिलुनत इत्यस्यान्योन्यं व्यत्यासेन लुनंतीत्यर्थः एतेन देवदत्तेन सह चैत्रो व्यतिलुनीत इ
त्येकवचनांतप्रयोगसंभवः अत एव दाराश्चेति सूत्रे कथं चतुर्थ्यर्थे तृतीयास्याद्व्यतिहारे तङो विधिर्दास्या
संप्रयच्छते इति भाष्ये उक्तं दास्या विश्राणयन् तया सहोपभुंक्ते इत्यर्थ इति कैयटेन चोक्तमिति वदंस्तत एव भाष्य
स्य पूर्वपक्षयुक्तित्वेनार्थासाधकत्वात् तया हि तस्यै विश्राणयतामुपभुंक्ते इत्यर्थः कर्मव्यतिहारे व्यशिष्ट
त्वमतीतेः तया सहोपभुंक्ते इत्येतन्मात्रे व्यतिहारप्रतीतेश्च सूत्रस्यावश्यकत्वात्॥ किं चोपपदविभक्ते
रिति न्यायेन विश्राणनानिरूपितचतुर्थ्या एव युक्तत्वं किं च धात्वर्थव्यतीहारे तृतीयावयि उक्तरीत्या कर्तृ द्व
यस्यापि तिङ्नैकत्वात्तेनैव न्यायेन प्रथमोचिता न सह योगतृतीयात्र तत एव क्रियायोगे पुत्रेण सहागा
त इत्यादौ कर्तरि तृतीयायां सिद्धायामक्रियायोगार्थं तेन सहेति सूत्रमिति तत्सूत्रे उक्तं भाष्ये॥ भाष्य
कृतां तत्फलगुरुत्वात्तत्र तद्दूषणाभिनिवेशः कृतः एतेन भट्टिकाव्ये विश्वामित्राश्रमे मारीचं प्रति
किमर्थं ब्रह्मन्वयाहिकारो बीति हामे साध्वष्टे मम मायं धर्म इति तेनोत्तरितेन धर्मो कृतः एतेन भट्टिकाव्ये

विश्वामित्राश्रमे मारीचं प्रति किमर्थं ब्रह्मवधादि करोषीति रामेणाप्युक्ते मम मार्यं धर्मद्विति तेनोक्तरीते
धर्मोल्लिसत्यं तव शास्त्रसायमन्यो व्यतिस्ते तु मम मापि धर्मः ब्रह्मद्विषस्तं प्रतिहन्मि येन राजन्यं बंधुर्ध्वे त
कार्मुके पुरिति रामवाक्ये तव धर्मेशादेव ब्राह्मणाद्विषरूपेणाममात्यो धर्मस्तपो रूपोव्यत्यासेन धर्मं भव
ति येन धर्मेणायुक्तोऽहं ये न धर्मेणायुक्तान् त्वत्सं वं धितो ब्रह्मद्विषः प्रतिहन्मीत्यर्थे केचि घारम्पत्वद्ध
र्मः कोऽयमपि भवति मद्धर्मोऽकोऽयं चत्वपि· वर्तमानसामीप्ये लट् रामवाणायातेन समुद्रसमीपे यति
तो मारीचस्तपः श्वरिष्यतीत्येतत्तात्पर्ये केव्यतिस्ते इति प्रयोगोपि यशस्तः यतो धातोरात्मनेपदं प्रत्यास
त्यात् तदर्थक्रियायां लक्ष्मौ क्त्वा प्रत्यये वाक्यपूर्वे चित्याश्रुतासस्मो रिति सूत्रवृत्त्युदाहृतं व्यतिसे इति
लुङ्कार्द संतत्त्र हि व्यसपेनद्धि वचनादि स्थाने एकवचनं· रिचे तिसूत्रे व्यतिहृ इत्यत्र यित थेवल्लोकेव
कवचनांतमसाध्वेवेति दिक्· ने विशः नेरिति षष्ठीनिरर्थद्वारा संबंधिनस्त धात्वार्थकस्य विशेरि
त्यर्थस्तननन्य विशते त्यादौ न दोषः परिव्यवेभ्य इत्यादावपि षष्ठ्यर्थे पंचमी सप्तर्थं चेदं शब्दः शित
इत्यत्र भाष्ये तत एवन्यादीनामुपसर्गाणां तेव ग्रहणमिति दिक् आङ्गे दो· अकर्त्रभिप्राये प्या

त्मनेपदार्थमिदं आस्य विरहणे ददातेरेव प्रसिद्धत्वेन संयोगवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वेन तस्यै
व ग्रहणमित्याह॰ ददातेरिति॰ आस्यग्रहणमिति। विहरणशब्दस्य क्रीडापादविहरणाद्यर्थत्वाभाववो
धनपूर्वकं विकासार्थत्वमात्रे तात्पर्यग्राहकत्वदिति भावः॰ प्रतिकमाद इति मिक्षामाददातीति चिंत्यमे
वयत्वत्र स्मरणे आकारोङित्वेत्यात्मनेपदं नेति तन्न स्मृतस्यार्थस्य स्मृतिविषयताद्योतकस्यैव भाष्य
वत्वेनाङित्वलाभात्स्मरणपूर्वके ग्रहणे धातोर्वृत्तौ तात्पर्यग्राहकत्वेन क्रियायोगसत्वेन ङित्वस्यैव
लाभाद्व्यङकारस्त्र स्यैकार्थस्यानुवादकः॰ रांपन्तस्येति॰ भाष्ये रांपन्तस्यैवोदाहरणादिति भावः ह
त्यर्थाश्चेति गणसूत्रे णिणौ चूर्हतेर्गत्यर्थत्वस्यापि सत्वात्॰ मात्वभिष्टा इति॰ सह स्वकं चित्कालमित्य
र्थः॥ शिक्षेरिति॰ अत्र जिज्ञासायामित्युक्तेर्हीनपदाध्याहारे आत्मनेपदे तात्पर्यग्राहकं वैयधिकेन्त्रा
धारे सकर्मीत्याह॰ धनुर्विषय इति। प्रकार इति धर्म इत्यर्थः नाच्छीत्वं। नियतत्तत्त्वभावत्ताः विषया इति
॰समभिव्याहृतपदान्तरगम्या इत्यर्थः॰ आलेखनं॰ खननं अथ स्किरत इति॰ अत्र क धातोः खनन पू
र्वके भूत्यादिविक्षेपे वृत्तिः॥ अपस्किरति कुसुममिति॰ इह आलेखनाभावात्सुडभावः स्त्रियमाहो

वृषभः पादैर्भुवमपकिरतीत्यत्र हर्षाद्यभावादप्रवृत्तिः नेष्यत इति · अत एव भाष्ये सत्सु द्धान्येवोदाहरणानि दृ
श्यन्ते · गजो ऽपकिरतीति । स्वभावाख्यानमत्र · आनुत इति · शृगालः उल्कागपूर्वकं शब्दं करोतीत्यर्थ इति कैय
टः · शब्द इति · परे तु उपलब्धमपि किरतीति स्वभावाख्यानमत्र · आनुते इति । अनेनेनात्मनेपदं भाष्ये उप
लम्भन इत्येव पाठ इह दृश्यते · उपलम्भनं प्रकाशनं धात्वोः शपथकरणाकप्रकाशने ऽन्योन्यत इ · तात्पर्यग्रा
हकः शपथस्य लोकप्रसिद्ध एव · अत एवोदाहरणे देवदत्तायेत्यत्र चतुर्थ्येव भाष्ये प्रयुक्ता · से ऽयः शपा
मि यदि किंचिद् विस्मरामीत्यादौ शपथमात्रं विवक्षितं न तु प्रकाशनं मूले उपालम्भ इति पाठ आक्रो
शार्थ इत्यादिव्याख्यानं च वत्यनुरोधेनेति वदन्ति · ईहा कापयपरिस्पन्दरूपो व्यापारः शतमुन्निष्ठतीत्य
स्यात्यघत इत्यर्थः उपाल्म · मंत्रकरणे कैर्थे वर्तमानादित्यर्थः संगतिकरणमुपश्लेषमित्रकरण
मनुपश्लिष्टस्यापि मैत्री संबंधः · लिप्सायामिति लिप्सोपसर्जने ऽर्थे वर्तमानादित्यर्थः उद्भ्यांउ
द्भ्यां किं निष्ठवति ज्वलतीत्यर्थः त्वर्वतं विनेवेति · वाक्ये वाक्यैकदेशप्रयोगन्याये न अत्र तु शब्दाध्या
हार इति भावः अस्यायुक्तत्वं मन्यमान आह · मन्तुमित्यादीति · तद्घटितवाक्यस्यैकदेशो ऽयमित्यर्थः

त॰शा॰शे॰
८६
86

समीपमेत्येति वेति। विषमविलोचनस्य समीपमेत्य स्वं वक्षस्थाजघ्ने इत्यन्वय इति भावः वेत्तेरेवेति व्याख्या
नादिति भावः अजैतीति द्वयोरिति व्याख्यानादिति भावः सूत्रे ज्वरत्वरेति ग्रहणं तौ दादिकस्य छेः संपूर्वात्त्व
रस्येपदव्यावृत्तये सम्रुच्छिष्यन्त इत्याद्यर्थं च। समार्ज्जेति। उश्वेति किलाद्गुणाप्राप्तावारश्वेति चाधित्वा
परत्वात्सिज्लोपे वृद्धिः सिज्लोपएकादेश इति सिद्धं कांडिवागद्वृद्धिं प्र ति सिज्लोपोऽसिद्धः यत्तु
ह्रस्वादंगादित्यत्रागपदस्वेन वार्णादांगं बलीय इति परिभाषया वृद्धेः पूर्वं सिज्लोप इति तन्न तस्या वार्णांगयोरेक
स्थानिकत्व एव प्रवृत्तेः तज्ज्ञापकस्य सनालीभावे प्रेष्यत्वेनागाधिकारस्य सैवांगस्य तत्र ग्रहणाच्च ह्रस्वा
दिति सूत्रेऽगपदप्रयोजनं तु तच्चैवोक्तं। अधावेष्टेति तु सिज्लोपस्यासिद्धत्वात्परत्वाद्गुणोदागस्य बल
त्वाच्च सार्वधातुके ति गुणो वृद्धौ सिध्यतीति भावः परेतु लावस्थायामटिति पक्षे सर्वतो वृद्धेरंतरंगत्वेन तत्
त्पक्षे सिज्लोपेऽपि तुल्ये भस्त्वे दकवाक्यतया पक्षान्तरेऽपि तदलोप एवेति तत्। किंच सिज्लोपएकादेश इ
ति सिद्धत्वमविप्रत्याप्त्या सिज्लोपनिमित्तकैकादेशं प्रत्येवोचितं मतु प्रकृतविषयमपि नचैका
देशापदसामर्थ्यं सवर्णादीर्घपदापेक्षयालघुत्वादित्याहुः मासमरतेति समर्त्तिशास्त्रीति सूत्रे राम॰
८६

वृषादिसूत्रेणायोगविभागसामर्थ्यात्परस्मैपदंदृश्यतेप्येवंधादितिभावः अतएवसमार्तमसमामीष्टाःसंक
ल्पास्त्वय्युपागतेइतिभट्टिःसंगच्छतेदृशोचसम्मत्तमेततत्॰परेस्तुशासइदितिसूत्रेआङ्शास्तेइत्यादाविलवारणा
यपरस्मात्प्रोसेरङिःहिनस्त्रस्यग्रहणमितिभाष्यमुपादायसर्वेशास्तीत्यत्रपरस्मैपदाधिकारान्नाशास्तर
ङिःत्युक्तेकेयटेनकिंचास्यातिवक्तीत्यनेनसत्रीत्यादेर्योगविभागस्यैफलंनिरूपयितुमशक्यमतएवभाष्ये
प्रकृतवार्तिकेधातुद्वयसाधारणेनमासमृतेत्याद्येवोदाहृतंएवंचभट्टिप्रयोगहत्यादिचिंत्यमित्याहुः अकर्मका
दित्येवेतिसम्भोगमित्यत्रोपसंख्यातत्वादितिभावः नचसंभोगमादिषुविद्यादीनामुपसंख्यानमितिभाष्येश्रा
दिशब्दबहुवचनाभ्यांसमः श्रृणुवइत्यत्राप्येवामुपसंख्यानेनसकर्मकेभ्योप्यात्मनेपदंप्रेष्ठकर्मकादित्येवेत्य
संगतमितिवाच्यंतेनैवसिद्धेत्रोपसंख्यानस्यैववैयर्थ्यापत्तेः नहितत्रसकर्मकादित्यस्तियेनाकर्मकार्थे
मिदंस्यात् भाष्येबहुवचनंतुप्रयोगभेदाभिप्रायेणेत्याहुः वहरतीति॰प्रावरणार्थस्यवहतेरर्थान्तरेसंद
नेवृत्तिरितिभावः जीवतीत्यत्रजीवनंकर्मधात्वर्थेनभूतंअकर्मकत्वंचपृथगुपस्थितेनकुत्रविहितक
र्मसंज्ञकानन्वयप्रयोजकत्वंस्पष्टंचेदंमुपच्चात्मनइतिसूत्रेभाष्येवर्षतीति॰इदंचिंत्यं॰अत्रप्रसिध्यात्र

दिस्युपस्थितस्यप्रविशपिंडीमित्यादाविवान्वयसंभवेन तद्वाचकानुपादानमात्रं नत्वेतावताकर्मकत्वं न्या
य्यं॰ कदाचिन्मेघोजलंवर्षतीतिप्रयोगात् अत एव तत्परसूत्रेऽयुक्तोयंनिर्देश इति प्रतीकमुपादाय न्या
येनासंबद्ध इत्यर्थः न्यायशब्दस्य तु प्रयोगः प्रसिद्धत्वान्न कृतः कदाचित्तु प्रसिद्धार्थस्यापि प्रयोगो दृश्यते न्या
येनायुक्त इति धात्वर्थेन भूतस्य तु प्रयोगाभावो न हि भवति जीवति प्राणानितीति कैयटेनोक्तं एवं रीत्या
ऽकर्मकत्वस्य भाष्येनुपलंभास्त्विति॰ अत्र मेशो विवक्षा नाम कर्मविशेषान्वयाविवक्षा सा च क्वचित्स्वाभावि
दिकी यथा मूलोदाहृतेनत्र निर्वाधिधं भावेलादीनामसाधुत्वं क्वचित्तु कार्यप्रवृत्तिवेलायां तदविवक्षा पश्चा
त्तु तद्विवक्षा यथा कृतपूर्वी कटमित्यादिवृत्तिविषये किंच कर्मणोधात्वर्थं प्रतिसंबंधसामान्येनान्वयविवक्षात्तु
तु कर्मत्वेनेत्ययमप्यविवक्षापदार्थः अत एव मातुः स्मर्यत इत्यत्राविवक्षितकर्मतया भावेलउक्तोऽधीगर्थेत्यत्र
भाष्ये हितान्वयइत्यत्रापि हितात्तु रूपाद्धितार्थस्ययोगेन संश्लिष्टगाते नडानातीति प्रतीतेर्मातुः स्मर्यत इति व
देवाविवक्षानैतु॰ एतेन दंप्रसिद्ध्यागतार्थमित्यपास्तमित्यन्ये निवृत्तमिति॰ सोपसर्गोस्यात्पूह्योः स
कर्मकत्वेनाकर्मकादित्येतत्संबंधस्य वक्तुमशक्यत्वादिति भावः॰ स्पर्द्धायां॰ स्पर्द्धाविषय इत्यर्थः आ

ह्वयतेः शब्दनस्यकृत्त्रेरिति भावः । वेः शब्द । शब्दः कर्मकारकं यस्य ततः कृञो विपूर्वादात्मनेपदमित्यर्थः । प्रयो
गोपाधयद्दृति । यथाशास्त्रेनयत इत्यत्र नयतेः प्रायणमर्थः । शिष्यादिसंमाननं तु तत्फलं तत्र संमाननस्य बोध
विषयः । एवं माणवकमुपनयत इत्यत्र विधिनाध्यापनफलकमुपनयनाख्यसंस्कारेणात्मसमी
पप्रापणं नयतेरर्थः । एवं हि सोध्यायक आचार्यो भवतीति आचार्यकरणं संमाननस्य बोधविषयः । कर्मक
रानुपनयते इत्यत्रात्मसमीपप्रापणं नयत्यर्थः । तत्र भृतिदानकरणकर्म वेतनं तन्मानस्य बोधविषय इ
ति भावः । कर्तृस्थे कर्मणीति । कर्तृस्थे कर्मकारके सतीत्यर्थः । शरीरशब्देनेति । शरीरस्य तादात्म्यायत्तत्वे व
कर्तृत्वेन शरीरस्य तत्स्थत्वासंभवः । अवयवानां तु संबंधविशेषेण तत्स्थत्वसंभव इति भावः । कर्तृस्थे ति
किं । राज्ञः क्रोधं विनयति । अन्ये तु विध्यर्थमिदं । अकर्तृगेपि क्रियाफले नयतिपो रूपमिति तु प्रमाद इ
त्याहुः । उपपराभ्यां । अस्य नियमत्वं वृत्तिसर्गेत्यनुवृत्त्यावोध्यं । विधित्वे तु अनेनैव सिद्धे प्रोपाभ्यामिति
सूत्रे उपग्रहणं वैयर्थ्यापत्तेः । प्रात्प्रारंभे इत्येव सिद्धेः । वेः पादवि । धातूनामनेकार्थत्वं बोधयितुं सूत्रे
पादविहरण इत्युक्तं । अनुपसर्गाद्वा इदं सूत्रं । लिटि आशीर्लिङि । च न अस्य विकरणोभ्यो नियमोच

तीयानित्यर्थे तावकृतापरानुदात्तङि॰ तङ्इति सूत्रस्य भाष्यप्रामाण्यात्॰ नित्यमेवेति॰ पूर्वविप्रतिषेधेनेतिभावः
संप्रतिस्मर्यां॰ उत्कंठापूर्वकंस्मरणमाध्यानंयोगोविमध्यत इति॰ अत्रवृत्त्यादिकमेवमानं।भासमानइति॰ शि
ष्येः स्मूयमानोहि भासेततथाचोपर्युपरिशास्त्रार्थप्रतिभासात्सुष्ठुक्तिर्निर्वहतितितेलोभंगेतुनशक्नुयादु
द्दितुमितिभावः त्ताने इति॰ शास्त्रैवदृत्त इतिबोधोऽनेरशास्त्रविषयकेज्ञानवत्वंमनसाबुध्यत इतिभावः यत्न
उत्साहः क्षेत्रेवदत्त इत्यस्य तद्विषयकमुत्साहमाविष्करोतीत्यर्थः विवदंत इति॰ वैमत्यहेतुकंनानाविधभा
षंत इत्यर्थः॰ वदेर्व्यक्तवागर्थत्वेन व्यक्तवाचामित्युपादानसामर्थ्यादेषांप्रसिद्धत्वं व्यक्तवाक्त्वंतेनैवेह
गृह्यंते तेनवरतनुसंप्रवदंति कुक्कुटा इत्यादौ नइरति विरामम निवृत्तीतरूसांप्रतिकद्विरामोचित्यघोति
कोक्तिरियंतदाह॰ मनुष्यादीनामिति॰ सम्मुखेत्यादि कि ।क्रमेणासंप्रवदंति॰ विभाषाविप्रः युगपत्परस्प
रविरोधेनकथनंविप्रलापः॰ भाष्यमिति॰ एवंचतुर्दादेरेवग्रहणमितिभावः समस्तं त्वतीयेत्यादिकं
तु भोलोकोसंचरसीमंचामुंचदेवलेति॰ दाणश्च॰ इदमशिष्टव्यवहारे दृश्यते॰ दानपूर्वके भोगेत्र
दाणधातुः ।सूत्रद्वयमिति शदेरिति सूत्रभाष्यानुसवेत्रैवषष्ठी व्यवहिते प्रवृत्तिश्चेतिलभ्यते स्व

स्वकरणं स्वीकार इति च्विसक्तप्रकृतिविकृतिभावाविवक्षणान्न । स्वीकारोत्पादने इत्यर्थात् स्वीकार इत्यव्युत्
पन्नं प्रातिपदिकमिति बोध्यं । पूर्वे सूत्रे सेवेति । एवं च तु स्वस्य सकर्मकविषयत्वेन सकर्मकस्यैव निषेधो कर्म
के तु परत्वात्पूर्ववत्सन इत्यात्मनेपदमिति भावः । प्रत्याङ्भ्यां । प्रत्याङ्सत्याश्रु धात्वर्थे विशेषकावेव प्रत्या
ङौ यद्यप्येवं नोपसर्गौ वेवेत्याशयेनाह । कर्मप्रवचनीयाविति । ते हि संबंधपरिच्छेदका न क्रियाविशेष
का इति स्पष्टमेव । पूर्ववत्सनः । प्रत्यासत्त्यासन्नः पूर्व इत्यर्थलाभः प्रकृतिगतमेव निमित्तं सन्नाश्रयविधाने व्या
त्मनेपदं प्रवर्त्तयतीत्यर्थः । ननु शिशिक्षतीत्यादौ शिक्षादिविषयशब्देनात्मनेपदविधानाच्छिद्विषयसं
नं तादृचि प्राप्नोतीत्यत आह । वाक्यभेदेनेति । स्वराद्युपसर्गात्स्वरान्तोपसर्गाच्चेत्यर्थः । णोरणो । इह वाक्यत्र
यं णेरिति त्र्यणौ यत्कर्म णौ चेदिति च सकर्तृत्विति तत्र स्यादित्यनेनाध्याख्यातं । द्वितीयं व्याचष्टे । अणा
विति । कर्मत्र क्रिया । यत्तदोर्नित्यसंबंधात् यच्छब्देन तच्छब्दाक्षेपात्सैव चेदित्यर्थलाभः न चात्र सत्ते
व प्रतिपाद्यतां किमेवकारेणेति वाच्यं । अध्यारोपितप्रेषणाद्वितीककक्ष्यायामधिकप्रवेशोपितत्स्नार्थं
त्रक्षत्पावाक्यं वैपर्थ्यापत्तेः । तृतीयं व्याचष्टे । अणौ यत्कर्मेत्यादि । अत्र पूर्ववाक्यमनुवर्त्तते कर्मशब्द

ल॰प्र॰शे॰
८९
८१

अकारकपरोऽस्याख्यानादिति भावः। सकर्त्तेति सर्वनाम्नां पर्यायेणोद्देश्यविधेयान्यतरलिंगतेति भावः तत्राऽसति प्र
तिबंधके उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयस्य व्युत्पत्तिसिद्धतयाऽसंपत्तावस्थायामस्य कर्मकारकत्वावच्छेदे
न णौ कर्तृत्वलाभस्तेन देवदत्तो गां याचते यज्ञदत्तं यज्ञदत्तो गां याचयति देवदत्तेन। यज्ञदत्तो गां याच
यतीत्यादौ नात्मनेपदं। यच्छब्देन तच्छब्दाक्षेपेऽपि सद्वृत्तिस्सप्तम्यर्थे। ननु णौ चेदिति व्यर्थं अणौ यत्कर्म स कर्त्तौ
त्यत्र कृत्वेत्याकांक्षायां प्रत्यासत्त्या यत्रात्मनेपदं तत्रैवेत्यर्थलाभादिति चिन्त्यः यच्छब्दवत्स्य सप्तम्यर्थलाभात् अत्र फ
लकल्पनात् भाष्यानुक्तत्वाच्चायुक्तेति प्रामाणिकाः। अणावकर्मकादिति। यत्र ण्यप्रसंगावस्थायामक
र्मकादित्यर्थेन प्राप्तिरिति भावः। पूर्वविप्रतिषेधेनेति अत्र च मानं दर्शयते राजेति भाष्योदाहरणं। चेत
णेति। सौकर्यविवक्षयेति भाव अत्र कर्मस्य क्रियत्वाभावेन कर्मकर्त्रर्थेऽपि शबादिः नत इति। फलवाच
कान्तत्वधिकरणे व्यापारे इत्यर्थः। पुनरपर्थ्यस्येति। संपन्नस्त इहितेर्थे लक्षणा गंगादिपदस्य तीरल
क्षणायामपि। टापस्थितिवत् णौ चक्षुस्थितिरिति भावः प्रथमतृतीययोरिति। सर्वनाम्नो वृत्तिमात्र इति पु
वत्। एवं तृतीयकक्ष्यायामित्यत्रापि। यावतीषु सोपानस्थानीयास्वर्थे विभागभूमिषु पदं विन्यस्ये

राम॰
८९

र्यप्रायोगिकीभूमिःप्राप्यतेतानुमयःकक्ष्यादिस्पृश्यंतेवस्थाइतिच॰तथाहिआरोहंतिहस्तिनंहस्तिपकाः
त्येकाकक्ष्याःततोणिचिव्यापारांतरप्रतीतिःस्यादतोमध्येत्याकक्ष्याआरोहयंतेहस्तीस्वयमेवेतिअत्रन्यग्भव
नमात्रमर्थेनततोणिच्यारोहंतीत्यनेनसमानार्थोत्तृतीयाद्र्यंचतृतीयवाक्यार्थेव्यावर्त्यमुक्ता॰उदाह
रणाकक्ष्योपपादिकाच॰ततोव्यापारत्यागेआरोहयंतेहस्तीस्वयमेवेत्युदाहरणमुक्तानतदुक्तं।न्यग्भावनान्य
ग्भवनंरुहौशुद्धेप्रतीयतेन्यग्भावनान्यग्भवनंण्यंतेविप्रतिपद्यते॰अवस्थांपंचमीमाहुर्ण्यंतेतांकर्मकर्तरि॰
निवृत्तप्रेषणाद्धातोःप्राकृतेर्थेणिजुच्यतइति।अत्रपंचमीत्वंयथाकथंचिदुपपाद्यंन्यग्भवनमधोदेशसंस्थि
त्यनुकूलोव्यापारस्तदनुकूलोव्यापारश्चन्यग्भावनातत्राद्यकक्ष्यायांन्यग्भवनेस्वहस्तप्रयोज्यतातिशयेन
न्यग्भावनायांकर्तुःप्रवृत्तिरितिप्रतीतिः।अन्यथाशिलायामंकुरोत्पादनायेवाप्रवृत्त्यापत्तेः।द्वितीयायां
तुप्रयोज्यस्यस्वव्यापारेसोवप्रवृत्तिरितिसौकर्यप्रतीतिः।तृतीयायांन्यग्भवनेस्वतएवप्रवृत्तत्वंदृष्ट्वातत्क्षे
मायकर्तृप्रवृत्तिरितिसौकर्यप्रतीतिः।उदाहरणेतुक्षेमार्थमपिनस्वव्यापारमिच्छप्रयोज्यकर्मव्या
पारोपेक्षितिसौकर्यातिशयप्रतीतिरितिबोध्यं।अत्ररूढौशुद्धेप्रतीयतेइत्यनेनार्थप्रतीतिर्नतु

त॰ शा॰ शे॰
ए॰
90

तद्वाच्यत्वं तयोरिति स्वचयन्ति तथाहि ऊर्ध्वदेशावच्छिन्नसंयोगानुकूलव्यापारो रुह्यर्थः रुहिर्गत्यर्थे इतियद्धि
तु परमित्यत्र भाष्यात् तदवच्छिन्नसंयोगाश्रयत्वेनैव गजस्य कर्मत्वं अत एवायं कर्तृस्थक्रियः संयोगस्य
कर्तृन्येपि सत्वात् उपरि गमनस्यत्यागूमवनं विनाऽसंभवात्तस्यापि मानसो बोध इति बोध्यं यद्वा तिं अ
त्रापि पक्षे क्रियासामान्यं निवृत्तप्रेषणाद्वितीयकक्ष्यामादाय बोध्यं तस्यात्राप्येतन्मूलत्वात् अत्राधिकमात्र
व्यवच्छेदेत्वेतत्पक्षीयप्रथमामादायापि तद्बोध्यं अयमपि पक्ष उक्तो हरिणा केचिद्देवदत्तादेर्व्यापारो
यः सकर्मके सविता देवदत्तादेः कटादिषु विवक्ष्यते सपदाप्रयोजककर्तृरन्तरेणापि कर्मणि वि
वक्ष्यते तदेतत्स्यात्रार्थः स्वीकृतप्रेषणां कर्म स्वस्य कर्तुः प्रयोजकं चेरणां तस्सेवं धत्ते न स्व विषयप्रेरणा
सर्वत्र स्वस्मिन्नस्तीति दर्शितं अन्त्यपक्षे स्वयं दूतीस्पष्टं निदर्शनं आद्यपक्षे त्वाद्योपदूती सापेक्षा तत
स्तदनपेक्षा सापि निदर्शनं द्वितीयकक्ष्यायां नतङिति नन्वेतत्समानार्थात्मो वितरणपथ्यस्यापि वर्क्कं
ग्राह्यत्वेन तामादाय क्रियासाम्यमत्रापि न च सामर्थ्यं तस्य तन्मूलभूता नत्वकक्षास्य णपंत धातुप्रकृ
तित्वं हि णपंतमूलत्वमिति वाच्यं एवं हि निवृत्तप्रेषणा चतुर्थकक्ष्यापां कर्मणः कर्तृत्वमाच

राम॰
ए॰

कक्ष्यामाद्ययोरपायमानमनुपपन्नं स्यात् तृतीयकक्ष्यांतर्यां तत्प्रकृतिकर्णं पंतत्वाभावात् द्वितीयकक्ष्यास्यप्रकृ-
तिकरणं पतत्वस्यैवतत्र सत्वात् न च पदार्थैकाद्यदर्थैकमूलकाद्यप्रयोगात् कक्ष्यांतरैर्थे स्वत्यागो वृद्धिर्वा सामू-
लभूतान्यस्ति स्याद्यकक्ष्यार्थैकदेशस्योदाहरणामूलकक्ष्यायां त्यागः द्वितीयकक्ष्यामूलकतृतीयकक्ष्यार्थै-
कदेशस्यापि तस्यां त्यागाद्भूतस्यास्यापि मूलत्वं नैवं प्रकृते इति वाच्यं कक्ष्ययोर्मूलमूलिभावस्य सूत्रभाष्या-
क्षराद्यनारूढत्वात् अंतर्भावितणपर्थे कक्षास्थधातो निवृत्तप्रेषणां तांक्तत्वात् हि चिक्कतेनत्समानार्थणंपत
प्रयोगे णातस्यास्यापि तन्मूलत्वलक्षतेश्वतदर्थमूलकानन्त्रवृद्धेः सत्वादिति चेन्न गमकं विनांतर्भावि-
तणपर्थतायामभावात् अणाविति किं निवृत्तप्रेषणापक्षीयतृतीयकक्ष्यास्य कर्मणोहेतुत्वारोपेणाद्वि-
तीयहेतुमण्णोरदर्शयतिमवोभक्केरित्यत्रैवमाभूदिति कर्मनिष्ठप्रयोजककर्त्वापाश्रयज्ञानविषयीभ-
वनमेवेति दिक्। मधुपापयत स्वच्छं सोमलं दर्पितांतिकैः। आत्मानं सुरताभोगविस्रंभोत्पादनं मु-
हुरिति भट्टिश्लोके आत्मानं सुरताभोगविस्रंभोत्पादनं दर्पयित्वेति शेषः मधु पिबति मधु
पापयतेत्यर्थोदने नैवात्मनेपदं धेनितं चेतज्जपर्मंगलायांकरेणाद्यरोहयते निषादिना मित्य

ल.श.शे० १९१ 91

त्रैमात्रापि गिरोच श्चिस्येव श्चात्मनेपदमित्यन्ये । स्मरयतीति निमित्ताद्रूष्टः । अपरे तु कर्त्तरि कर्म्मव्यतिहार इति सूत्रे क्रि
याग्रहणं कर्त्तव्यमिति सूत्रकारं शिक्षां कुर्वतो वार्त्तिककृतः कर्म्मवदस्य क्रियापरत्वं नाभिप्रेतमित्यर्थंपतस्य प
त्कर्म्मपदार्थं पंतेते तदेव कर्म्म भवति तदात्मनेपदमित्युक्तमवार्त्तिकस्य कर्म्मशब्दस्य क्रियापरत्वेन व्याख्यानं तन्न
युक्तमित्युभयत्रापि कर्म्मशब्दस्य कारकपरत्वं । अत एव तद्व्याख्याने भाष्येपि कर्म्मशब्दप्रयोग एवं कृतो न क्रियाशब्द
प्रयोगः । नापि कर्म्मवद्भावद्वात्र सकर्म्मकाणां प्रतिषेधो वार्त्तिककृतोक्तः । तत्र द्वितीयवाक्येनारोपयत्कर्म्म
णो चेत्तदेव कर्म्मेति कर्म्मान्तरनिवृत्तिः प्रतिपाद्यते न त्वणौ कर्म्मणो णौ कर्तृत्वं । उत्तरवाक्येन तस्य कर्तृत्वप्रति
पादनात् । एकस्यैकस्यां क्रियायामुभयरूपत्वासंभवात् । न च दर्शयते भृत्यान्राजेति भाष्योदाहरणविरो
धो भृत्यरूपस्य कर्म्मणः सत्वादिति वाच्यं । एतन्मद्भाष्योदाहरणप्रमाणापादितो ये कर्तृकर्म्मणी तद्भिन्नक
र्म्मव्युदासे तात्पर्यात् कर्त्तरि कर्म्मेत्यतः कर्तृग्रहणमनुवर्त्य प्रथमपादविषयिणामव्ययज्ञयस्य यदि त्वेक
त्रोबाणायमर्थो लब्धः कर्म्मान्तरनिवर्तकवाक्यफलं तु आरोहंति हस्तिनं हस्तिपकाः आरोहयमाणो ह
स्ती स्थलमारोहंतीत्यत्येव । सोकर्यति श्वाय प्रतिपादनाय प्रेरणाद्विवज्ञत्प्रतिपादनायैव फलं शब्द ध्या

राम० १९१

द्विकर्मत्वं। अत्रोर्ध्वदेशात्तत्स्थवस्तुनस्तदुभयसंयोगानुकूलो व्यापारो धात्वर्थः। स्थलशब्देन गजस्कन्धस्य काष्ठादिप्र
यमुपवेशनस्थानमुच्यते। गजोर्ध्वदेशसंयोगानुकूलव्यापारे शातत्वमप्यवनरूपे शातत्स्थवस्तुसंयोगोपि
जात इति सोकर्षोतिशयोत्र बोध्यः। आरोहन्ति हस्तिनं हस्तिपका इत्येषां आरोहयमाणाइत्यस्यैव मूलभूता
आरोहयमाणादित्यंतस्यत्रोदाहरणप्रदर्शनं दृष्टांतार्थं यथा तत्रानेनात्मनेपदं तथात्रापि स्यादिति तदा
शयः। किंचास्योदाहरणस्यानमनुष्याः स्थलमारोहंतीति मूलकक्षानापितान्स्थलमारोहयतीति स्थलं
कर्म। आरोहयमाणो हस्तीति आनडंतप्रयोगेणामनुष्यकर्मकारोहणाश्रयस्तो हस्तिन एव कर्मत्व
प्रतीतेः शतृशानजाद्यंतार्थानां स्वभावतः क्रियांतरसाकांक्षत्वात् क्रियांतरस्य चानुपस्थितेः। एवं च
लक्षीत्या मूलकक्षानिरूपणोऽणौकर्मणो णौ कर्तृत्वाभावादप्राप्तेः प्रत्युदाहरणसंगतिस्तत्र हस्ती
त्यंतस्य सूत्रदृष्टांतार्थत्वेन तु तिङं न भवेत्संचारयेत्। किंच कर्मपदस्य क्रियापरत्वे समानक्रियत्वप्रदर्श
नाय द्वितीयकक्षाप्युदाहर्तुमुचिता कर्मणः कर्तृत्वबोधनाय प्रथमकक्षावदितितदनुक्त्वाकारकपर
त्वमेवाभिप्रेतं लक्ष्यते एवं प्रथमप्रघट्टकेनाकर्मकाणामेवेतदुदाहार्यत्वं मन्यमानेन सकर्मकाणां

त॰श॰शे॰
१८२
९२

प्रतिषेधस्यसूत्रकृतानुक्तत्वेनसूत्रीत्यांतेष्वपिकर्मवद्भावप्रवृत्तिंमन्यमानेनवाचार्यदेशीयेनकर्मकर्त्तृत्वात्सिद्धमि
त्युक्तेऽत्रनाध्यानेद्वतिप्रतिषेधस्यप्रतिषेधसमर्थनायेदमित्याशंक्याध्यानार्थकानांकर्त्तृस्थभावकत्वात्तत्रक
र्मवद्भावस्यैवाप्राप्तेर्निषेधेनफलमित्यंतेनमध्यमप्रघट्टकेनसूत्रवैयर्थ्येऽस्माचार्यदेशीयेनशंकितेयथा
तत्राध्यानविषयेकर्त्तृस्थभावकत्वादप्राप्तेर्निषेधवैयर्थ्यंतथाकर्मवद्भावप्राप्तियोग्येविषयेऽत्रात्मने
पदार्थंसूत्रमित्याशयेनाचार्यैरेतदेवज्ञापयतिभवत्येवंजातीयकानामात्मनेपदमितिविध्यर्थमिदमिति
तृतीयप्रघट्टकेसिद्धांतितं।तत्रएवंजातीयकानामित्यस्यकर्त्तृस्थभावकजातीयानामित्यर्थःतज्जातीयत्वं
चकर्मवद्भावप्राप्तियोग्यत्वेन।एवंचकर्त्तृस्थभावक्रियवत्सकर्मकाणामप्युदाहरणानीतिध्वनयतो
दाहृतंदर्शयतिभस्त्यानुरज्जेति।अतएवद्वितीयपक्षेऽप्युत्पादककारिकयोःखेरणाद्दृष्टिप्रदर्शनवतखेर
णाद्व्यस्याग्रविषयोदाहरणकृताप्रदर्शनंनकृतमाद्यपक्षइवतेनतत्रद्वितीयकक्ष्याप्युदाहरणमिति
सूचितं।किंचगम्भीरायांनद्यामित्यादौगम्भीरनदीतीरबोधेनलक्षणात्तात्पर्यग्राहकतयागम्भीरादि
पदसाधर्म्यस्यवदिहकर्मपदस्याशाचस्यसार्थकमन्वयोवानोपपादयितुंशक्यः।नचकर्मप

राम॰
१८२

दृशिश्च घटितस्य तद्रहितेस्वार्थे संबद्धे लक्षणेति न दोषोत एवणिवृत्तिर्व्यवस्थितिरिति वाच्यं प्रेरणारूपेप्यर्थे
शास्त्रेण साधुत्वबोधितस्यान्यार्थे लक्षणयापि साधुत्वस्यैवक्तुमशक्यत्वात् तस्माद्दृशिर्न विषयीभव
नसमानाधिकरणप्रेरणावास्तवीश्चारोपितावाणिजर्थ इति णिचः साधुत्वं कर्त्रेत्वं चस्त्वस्योपपन्नं।
अत एवरणंपतारणंपतयोर्न्यग्भवनतदनुकूलव्यापारयोः प्रतीत्युपपत्तये पंचम्यामवस्थायां णिजुप
यन्तये च हरिणा निवृत्तप्रेषणाद्युक्ताः प्राकृतेर्थौ णिजुच्यते ब्रवीति पचतेरर्थे सिध्यतिनेविना णिचा·
म्रणपंतः पचतेरर्थे सर्वथैवावतिष्ठते तद्वद्धरेर्णोणेश्चतुल्यार्थत्वं प्रतीयते इत्युक्तमिदमुक्तं तृतीय
कक्ष्योदाहरणाभूतपंचमकक्षोभयसाधारणं· तत्र द्वितीयकक्ष्यायां न्यग्भवनसमानाधिकरणोव्या
पारोर्थः तत्र णिचित्तृतीयाकक्षा तत्र णिजर्थव्यापारस्य प्रकृत्यर्थव्यापारस्य चत्यागे श्रारूह्यतेहर
णीतितुर्याकक्ष्यात्वं स्वरसतउपपद्यते एवं च पूर्वस्तीनादृयरणंपतस्तत्समानाकारो भिन्नार्थएवः एतत्स
र्वैमन्व्याख्यानोपायमात्रमिति बोध्यम् एवं च समानक्रियत्वासंभवोपि बोध्यः· कर्मवद्भावात्सिद्ध
मिति प्रतीकमुद्धाय त्लावयति केदारो देवदत्तेनेत्यत्र केपटेरं परस्मैपदं तु तद्दीस्या बोध्यं· प्रायेणा

त्मनेपदपाठएवनत्त्वदृश्यतेकरिष्यमाणासिद्धांतानुसारीतुसः एवंपूर्वविप्रतिषेधोपिचिंत्यः। भाष्येनुक्तेर्द
शेषात्तेरप्रडेत्यत्राणावकर्मकादित्यस्याप्राप्तेः समभाष्यप्रयोगेणिगोन्तमानंत्रणावकर्मकादित्यत्रोद्देश्यतावच्छे
दकावच्छेदेनान्वयस्यलोकव्युत्पत्तिसिद्धतयाऽयंतावस्थायावच्छेदेनाकर्मकत्वप्रतीत्याऽत्यंताविध
मानकर्मकेष्वेवतत्प्रवृत्तेरिदंचाणंतसकर्मकेष्वितिविषयभेदात् विभाषोपपदेनेत्यस्यचवाधेनेवमा
नंयश्यामइतिप्राहुः। विभाषोपदर्यंप्राप्तविभाषेतिनवेतिसूत्रेभाष्ये स्वरितञितइत्यादिपंचसूत्र्य
त्रानुवर्ततेकर्त्रभिप्रायक्रियाफलविषयआत्मनेपदमितितदर्थः अयापितदर्थद्योतकमात्मने
पदमेवमपिव्यतिलुनीतइत्यादौव्यतिग्रहणंद्योतितेकर्मव्यतिहारेआत्मनेपदमिवेहापिप्राप्नोतीति
प्राप्तविभाषेवेतितदाशयः॥ इत्यात्मनेपदप्रक्रिया॥ कर्त्रैवयदिति। कार्यातिदेशोप्यतिदिश्यमान
कार्याणामुत्पत्तिर्देशस्यवदेशइतिमतेइयमेवकल्पनावोध्या अत्रत्यभाष्यस्वरसोप्यत्रैवपक्षेतत्र
त्वतस्तत्रविभाष्येशास्त्रातिदेशकार्यातिदेशयोरभेदएवसूचितः एवमग्रेपिकेचिदितिनैतद्भाष्यद
ष्टं। उपाञ्च उन्नंस्त्रियोरित्यसेवानुवृत्तये योगविभागः तुदयुध अत्राकर्मकाणांयदर्शेन भावितएषा

र्थत्वेन सोपसर्गत्वेन वा सकर्मकत्वं तदर्थस्य मन्यचित्तवत्कर्तृकार्थे च ग्रहणं चित्तवत्कर्तृकाणां तु सक
र्मकार्थे। प्रीतिं भक्तजनस्य योजनयते इत्यादि प्रामादिकं यद्वा भक्तजनः प्रीतिं जनयत्यात्मनस्तस्य
तामीश्वरो जनयतीति तस्य ताराणां साधु। प्रयोज्यकर्तुः शेषत्वविवक्षायां भक्तजनस्येति षष्ठीत्या
हुः। निगरणाच। अत्र निगरणशब्देन न पादमीति सूत्रे पा ग्रहणात्पानमपि गृह्यते। इमां किमाचामय
न्तं चक्षुषी इति श्रीहर्षपद्ये इमामित्यस्यैतन्मुखचन्द्रचन्द्रिकामित्यर्थेनाचामयतेः सादरहन्तानत्वाक्ष
िणिकतया निगरणार्थत्वाभावान्नानेन परस्मैपदमत एव चक्षुषोः कर्मत्वं ज्ञानार्थत्वादिति बोध्यं।
यद्वितु त्वरिनिवर्त्तेकस्तत्राप्तारस्य पानं सर्वेन्द्रियाणां च हरुलविषयविषयकेक्षुत्त्रेषु इत्यर्थे
स्येतरेयोपनिषदि स्फुटत्वाद्त्र न लक्षणा किंतु मुख्यमेव निगरणं तदा चिंत्य एवायं प्रयोग इति
बोध्यं। प्रामस्येवायमिति अनंतरस्येति न्यायादिति भावः। अणावचित्तवदित्यादि किं सुष्यंति व्री
हयस्तान्नृशोषयते अकर्मका किं कटं करोति तं प्रयुंक्ते कटं कारयते। इतरे इति। दमिरकर्मकोपि
स्तत्रामारोपात्। अत एव दमिः सकर्मक इति द्विवादिस्थ ग्रंथेनाविरोधः परे तु अकर्मकत्वे

त॰शा॰शे॰
ए४
९५

समसूत्रसमानत्वेपि सकर्मकत्वमात्रं चिंत्यमित्याहुः वासयत इति॰ लुङ्विकरणापरिभाषया दादेः सकर्म
कतया च म्बादेरेव ग्रहणं वसेः परस्मैपदं स्यादेवेति॰ अनंतरस्येति न्यायेन योगद्वयप्रापितपरस्मैपदस्य
व निषेधादिति भावः पाययतीति॰ शाच्छासेति युक्॥ इति पदव्यवस्था॰ सार्वधातुके यक् धातोरेकाचइ
त्यतो धातोरिति चिरंमाचेत्यतो भावकर्मणोरिति चानुवर्तते॰ उत्पादना॰ फलोत्पत्त्यनुकूलो व्यापारः फ
लत्वं च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थविशेष्यत्वे सति तद्धात्वर्थत्वं अनेकपर्यायोपादानं चे
त्तत्ताचेत्तनद्वित्तिफूत्कारयत्नादीनां क्रियात्वं धात्वर्थत्वं च बोधयितुं अत एव पचति पाकं करोतीत्यादि
क्रमेण अकृत्स्नसर्वधातूनां विवरणमिति भूवादिसूत्रे भाष्ये स्पष्टं॰ क्रियात्वं धातुवाच्यत्वसमानाधिक
रणो जातिविशेषः तत्र घटकधातुत्वं च जातिविशेषः तत्परिचायकं च भूवादिसूत्रे॰ धातुत्वेनेति॰ तद्व्या
प्यपचित्वादिनेत्यर्थः फूत्कारादीनां चन्नत्वद्वयरूपेणाशक्यता प्रामाणिकत्वाच्च नानाशक्तिकल्पनानन्दो
षाय धातुत्वं तु न शक्यतावच्छेदकं तद्ज्ञानतो पि बोधात् सर्वधातुभ्यः सर्वक्रियाबोधापत्तेश्च सकलेति अ
कर्मकाणामप्यशब्दद्वयाभिधायकत्वात् फलव्यापारयोर्वैयधिकरण्ये सकर्मकत्वं समानाधिकरण्ये राम॰
ए४

कर्मकर्तृत्वं बोध्यं ॰धातुवाच्येति॰करोतीति कर्त्रीत्यादौ तथात्वक्लृप्तत्वादिति भावः॰सामानाधिकरण्याभावादिति॰ अस
त्वभूतक्रियायाः सत्त्वार्थकयुष्मदादिसामानाधिकरण्यासंभव इति भावः तिङ्क्ष्वेति॰तिङर्थेष्वित्यर्थः॰लिंगाद्य
नन्वयित्वं सर्वनामपरामर्शायोग्यत्वं वाऽसत्त्वं॰श्रौत्सर्गिकत्वेनेति। एकवचनमित्येवसूत्रमुत्सर्ग इति भा
वः॰परे तु क्रियायामेकत्वमस्त्येव एका क्रियेति रूपवादिसूत्रस्य भाष्यात् एवं च तस्य प्रकृत्यर्थेऽन्वयात् एक
वचनं द्वित्वादिकं स्तोतरतिङ्गुत्थकारकगतं तत्रारोप्यत इति कस्यैकमेतिड॰ बुद्धिवचनादि सिध्यतीति तस्या
प्यन्वयः प्रकृत्यर्थे स्वयथाह तदाशायिकाः शाप्यते इत्यादौ हत शयनसदृशानि शयनानीत्यर्थके उपमा
ने बहुत्वोपादानसामर्थ्येनोपमेये तिङर्थे क्रियारूपे उपमानगतबहुत्वारोपेण बहुवचनं तद्वत्॰ति
ङ्गुत्थकारकगतायास्त्वारोपेणान्यकारकगताया इत्यत्रार्थे शक्तिस्वभाव एव बीजं॰तदुक्तं हरिणा ए
कत्वेपि क्रियाख्याते साधनाश्रयसंख्यया भिद्यते न तु लिंगाख्या भेदस्तत्र तदाश्रय इति। न च प्रथमपु
रुषेऽपि न स्यात् तस्यापि शेषसामानाधिकरण्ये नियतत्वादिति वाच्यं शेषग्रहणात्पत्क्वा प्रथमस्य उत्स
र्गत्व करणेन तत्सिद्धेः तत्र च नैकवचनवत् एकवचनमित्युत्सर्गेणात्मस्य प्रकरणोक्तरीत्याऽ

व्ययेभ्यड्वसर्वैकवचनायत्तेः स्पष्टं चेदं युष्मदीतिसूत्रे भाष्येइतिवदंति॰ ससिच् अत्र यथासंख्यंनास्वरितत्वा
त् उपदेशे इत्यचस्यविशेषणंनात्वेबाम व्यभिचारात्तदाहोपदेशेयड्इति॰ अजितिपृथक्पदं लुप्तविभक्तिकेसो
त्रो वाममासइतिभावः इड्ढिधायकेस्यादीनामितिविभक्तिविपरिणामः अंगस्यतु नेड्भाष्येआर्धधातुकस्ये
तिप्रोगंविभज्यपावानिट् सआर्धधातुकस्येवेतिपरिभाषणात्लक्ष्यानुरोधाच्च॰ चिण्वदितिसप्तम्यंता
इतिः उपमेयेसप्तमीदर्शनात् चिण्वद्भावोत्रप्रधानमिद्तुचेनात्संनियोगशिष्टः भावकर्मणोरितिन
स्यादीनां विशेषणं सीयुटोभावकर्मवाचित्वेपिससिच्तामीनांतत्वाभावात्नापिभावकर्मवाचिनित्व
त्ययेपरेयेस्यादयइत्यर्थः स्यादीनांतादृक्प्रत्ययपरत्वसंभवेपिसीयुटोऽसंभवात् आगमविशिष्टे
प्रत्ययत्वार्थवलाद्यंगौकारादत्तोविषयसप्तमीत्याह॰ गम्यमानयोरिति॰ चिणभावाल्लेरितिचिणत्वेइत्यत्
स्तेइतिचानुवर्त्तते॰ पुनश्चिण्ग्रहणात्तुनरुधइतिनिषेधाननुवृत्तये॰ इत्याहुरिति॰ अत्राहुश्चिण्वदि
तुसाहचार्याश्रयणेदृढमानाभावः ननुगपंतस्योपदेशाभावात्तत्रचिण्वदिट्नस्यात् उपदेशेयो
ऽच्इंतागमसेत्यर्थेविशेषणेरितास्मारितेत्यादौनित्यत्वाद्गुणेरपरत्वेचचिण्वदिट्नस्यात्नहिणंतस्योप

देशोयेन्नूतदंतत्वमस्ति · भूर्न्नीप्रभृतीनां गुणोउपदेशेयोन्नदंतत्वाभावाद्दोष एवेति चेन्न · अतोलोपइ
त्यत्रैवार्धधातुकोपदे शेयदजंतमित्यर्थेनादोषात्तत्रैवात्राप्याहृत्यासीयुड्विशेषणत्वमपिकृधो
तोस्तदुपदेशेजंतत्वंतु अपदेशि वस्त्रावेनबोध्यं · तयोनुता · चादच: कर्मकर्त्तरीत्यतः कर्मकर्त्तरीत्य
नुवर्त्ततेचिणात्तेइतिसूत्राच्चिणितिनहध इत्यतोनेत्यिचवर्त्ततेभावेवालुङि · स्याह · वायेनेति · अ
चिचायेकर्मकत्वापश्चादृशोचीत्यर्थः कर्मकर्त्तरितदाहरिष्यतेत्रचि णणात्लोरितिप्रसज्यप्रतिषे
धेचिएवम्न्द्रवेननिषेधः पर्युदासेपिनदोषः अतिदिष्टमानधर्मेविरुद्धस्वाश्रयस्यातिदेशस्याभाव्ये
नानंगीकारादिति भावः ध्वानिष्पत इति · करद्धुनोरितिवाधित्वात्स एवस्यादत आहाशीर्लिङी
तिअपवाद इतिवाक्यार्थबोधवेलायांबाधकाभावेनहंतेरपिसीयुटासंबंधेनतस्यनिरवका
शत्वात्पश्चाल्लक्ष्यसंस्कारवेलायांप्रियतवधबाधस्तेनत्याप्य: सीयुड्तुतद्विषयेचरितार्थइ
तिभावः परेत्न भयत्रापिहूंद्वनिर्देशात्समुदायस्यसमुदायेनसंबंधोन्याय्योनतुप्रत्येकंच
तुर्णांसंबंधः शब्दात्लभ्यतेएवंचननिरवकाशत्वमतएवभाष्येविप्रतिषेधउक्तः बाधमावास्ती

त॰मा॰शे॰ एधि॰ ९८

पुढिचिएवत्वं विप्रतिषेधे नेतिचिण्वुभ्द्यावक्वाक्येपि स्यादिष्विति विषयसप्तमीति भाष्याशय इत्याहुः अत्र द
र्शिषातामिति॰ नदृशऽइति निषेधात् त्वेः क्तोनः षिचःकित्वादिति॰ लिङ्॰ सिचावात्मनेपदेष्विस्तेन न॰ ल
त्वमचिविभाषेत्यनेन ढत्वे विभाषेट इत्यनेन॰ द्वित्वत्रयं॰ मस्पठधयोश्चानचीतिवस्य यणोमय इ
तित्रयं॰ ढवमानामिति॰ अचोरहाभ्यां यणोमयोनचिवेत्येतैः नस्यानिवृत्तिरिति॰ आभीयासिद्धत्वंतु
न व्याश्रयत्वादिति भावः॰ भाष्यत्विति॰ नपदांतसूत्रस्थइतिआदिः नन्वेवं एयन्ताण्णौ लोपे दीर्घविक
ल्पानापत्तिर्व्यवधानात् तत्राह॰ णाविति इति॰ नपदांतसूत्रस्थभाष्यापेक्षयाप्रकृतसूत्रस्थणौङ्व्यव
तानांयङ्॰ लोपेचोपसंख्यानमिति वार्त्तिकस्य स्थानिवत्त्वनिषेधे नप्रत्याख्यानपरं भाष्यंदुर्बलं
प्रकारांतरेणापि प्रत्याख्यानसंभवादित्यभिमानः। प्रकृतसूत्रस्थैकमेवौणौङि इति सूत्रस्थं च भा
ष्येऽत्रापि दीर्घे स्थानिवत्त्वनिषेधोत्र एवदीर्घग्रहणं चरितार्थमित्युक्तं तत्प्राप्राण्पा द्वरेय लो
पस्वरवर्ज्ज्ञे द्वित्वेच॰ नादीनि न कर्त्तव्यानीति वार्त्तिके वर्ज्येको टो दीर्घोप्युपलक्षणी यो हेडधातु
श्चघटादावसांप्रदायिकः ख्याकृतिनिर्देशस्य वक्तुमशक्यत्वं चोपपादितं प्राक् किंचमितं स्याय राम॰ एधि॰

ङः लुक्समत्वे वार्त्तिकवैयर्थ्यापत्त्यात्तदनभिधानावश्यकत्वेन यङ्लोपे चेत्यंश एतत्प्रत्याख्यानासं
भवः दीर्घेनस्थानिवदित्यंशस्त्वे पादिकपरइत्यभिमानेन वचनारंभस्तदभिमानत्यागेन भाष्यकृतउ
न्नरमितिनमेकश्चिद्दोषस्तदाशय इति न पदान्तसूत्रभाष्याशय इत्यर्थः निर्देशइत्युत्तरं दीर्घग्रहणा
चेदं मास्त्वित्यपाठः हेडे घेटादौ यठित्ताञ्जिणिात्रहि डिम्रहीडीति हपांर्थेतत्सत्वात् ह्रस्वविकल्पे त्वहे
डीति स्यात् इदं केयटादौ स्पष्टं भाष्यरीत्यात्तु स्थानिवत्वनिषेधायैव दीर्घग्रहणमावश्यकमित्याहुः शा
मिष्यतेइति स्मादीनां चित्वत्वात् दीर्घः शम्यते मुनिनेति अकर्मकत्वाभ्दावे लः नोदात्तोपदेशउप
देशोत्पन्नेनशमीत्यादौ चिनुणिवर्ण्यमाने स्वरे णानुदात्तत्वेपिनिषेधः अनाचमीतिपघपि भाष्ये
श्वाङ्ः हितस्वपउपतेतथाष्याचामइत्येवभाष्ये उदाहरणादाङ्पूर्वेस्वप युदसत्त इतिभाव कविभा
षा चिण्णमुलोरित्यत्तोलभेरितिवर्त्तेते प्रादेरित्युपसर्गोपलक्षणाभाष्य स्वरसात् तत्रहि उपसर्गात्ख
ल्वित्यत उपसर्गादित्यनुवर्त्यनसुदुर्भ्यामित्यतो नेति चानुवर्त्योपसर्गोत्तरस्यलभेर्विभाषानेति
व्याख्याते चिण्णमुलोरनुपसर्गस्येति वक्तव्यमिति निवचनमेववार्त्तिककृताकृतं द्विकर्मके

ल॰ शा॰ टी॰
९७
97

पुलादीनामवस्थामाह॰ द्विकर्मकाणां त्विति॰ दुह्यादेरित्यनेनाकथितं चेति सूत्रविषयाणां ग्रहणं प्र
धाने इति। एतेन तेषां दुह्यादिपाठो संगत इति दर्शयन्ति अन्येषां गत्यर्थाकर्मकहृकरोतीनां॰ एतत्तु च
निकर्मचसर्वं चेदमकथितं चेति सूत्रे भाष्ये॰ एतदप्यनेकसंनिधौ॰ तदभावे तु मुख्येपि भवति ग
वां दोग्धि पयः पय इत्यादितदुकर्मकथितं चेति सूत्रे भाष्ये॰ गुणकर्मणि लादिविधिः सपरेक्षं व चेष्टि
तयुक्तिषु वाच्यगुणे॰ अपरस्माह प्रधानकर्मण्याख्यये लादीनां कुर्द्विकर्मणां अप्रधाने दुहादी
नां स्पते कर्त्तुरश्च कर्मणाः इति उक्तं स्मृते आधार्धेनयति स्तक्ये पादे गमिरहदा हतः॰ अकर्मकाणामि
ति॰ लः कर्मणीति सूत्रेनिर्णीतमेतत् इति भावकर्मप्रक्रियानविवक्ष्यत इति॰ तत्तत्कारकव्या
पारस्य प्रधानधात्वर्थेन विवक्ष्यत इत्यपि बोध्यं॰ कर्मणस्त्विति॰ फलसमानाधिकरणेन तद्व्या
पारस्यैव प्राधान्येन विवक्षायामित्यर्थः प्रायेण कर्मका इति व्यापारव्यधिकरणफलाश्रय
स्याभावादिति भावः॰ द्विकर्मकाणां कर्मणाः कर्तृत्वविवक्षायामपि स कर्मकत्वात्प्रायेणेति॰
अकर्मकत्वफलमाह॰ तेभ्यो भाव इति क्रियापाः कर्मणा साधनेन तुल्यत्वासंभवात्कर्मश्र

राम॰
९७

वृत्तस्थक्रियालक्षकः यंचाः कौशंतीतिवत् तुल्यक्रिय इतिबहुव्रीहिः एकरूपयोरपि क्रिययोः कर्त्तृ
कर्मावस्थाभेदेनौपाधिकभेदासेपेशात्तुल्यत्वमुपपाद्यर्थः कर्त्तरि शपित्यतः कर्त्तरीत्यनुवर्त्यप्रथम
याविपरिणाम्यत इत्याह कर्त्तेति कर्मस्थक इत्यर्थे शं कावारणायवृत्तिः तादृशोर्थे हि सकर्मक
त्वाभ्द्रावे लो न स्यात् कार्यातिदेश इति प्राधान्यादिति भावः नच कार्यातिदेशपत्ते हि शूपमानुका
र्याणामुत्पत्तिरेश एवदेश इति भाष्यसंमतेपक्षे परत्वाक्लृप्तपरस्मैपदे स्वे स्यात्तान न तु यगात्मनेपदे इ
तिवाच्यं न दुहस्नुनमां यक् चिणौ कुविरजोरित्यार्धंमसामर्थ्येन परमपि बाधित्वात्तयोरति
देशात् तदाह तेनेत्यादि द्वितीयापत्तोरिति नचोक्तरीत्या परत्वात्तृतीयापत्तिः द्वितीयेत्यनेन
कृत्यादेरुपलक्षणेनादोषात् कार्यातिदेशेतिदेशादेशस्य एवदेश इति मतेमृत्तमित्यत्वे त्रातिदे
शेनस्वनिष्ठाकर्मकत्वस्यानिवारणेन भावे लो न स्यादिति न शंकितं यदि तु त्रातिदेशपमा
न विरुद्धत्वाश्रयाभावोतिदेशस्याभावान्तदा सो पिदोषो बाध्य इति केचित् लकारवाच्य इ
ति तत्रत स विधानादिति भावः द्विलकारकादिति स्वत्वानिर्देशो वान्यपदार्थः लइनीति

अनेन तस्य खलु प्रबलत्वं तत्त्वं दर्शयति । कृत्यक्तेति । इदमुपलक्षणं । कतीह भिदाना: कुसूलात् । अत्र चानशि न कर्म
वत्त्वमिति न यगित्यपि बोध्यं । क्रोऽत्र निष्ठेति सूत्रविहितः कर्मोऽर्थे कोऽस्त्र तत्तेनेना कर्मकर्तृप्रयुक्तः कर्मेरितो
भवत्येव । अत एव सिनोतेर्ग्रासकर्मकर्तृकस्येति संगच्छते । तेन परस्तुभिन्नः कुसूलादित्यादौ तृतीयाकर्म
णीति पूर्वपदप्रकृतिस्वरस्याभावसिद्धिः । एतेन सृज्यस्यात्मानमात्मनेत्यादाविव यावधिकभेदमाश्रित्यस्व
यमित्यस्यात्मनेत्यर्थोत्कर्तृत्वेनौदनस्य कर्मत्वान्मुख्यकर्मण्येव प्रत्ययोत्तक्तिमतिदेशेनेत्य यास्त्वं क्तादी
नामप्यापत्तेः निहन्यते प्रवणतायां साधुसिध्यति न त्वीतिवत्पच्यत्योदन इत्यस्यापत्तेश्च । न मते दंडइत्यादौ
पक्रियोः प्रतिषेधशापूर्वङोरनापत्तेश्च क्वचित्प्रयुज्यमानं स्वयमेवेतितु कर्तृत्वेन राभावप्रतिपादनपर
मितिदिक् । व्यवहारइति । उपयादितमेवत् । वत्यासत्या समानधातौ कर्मस्थक्रियया तुल्यक्रियत्वाश्रय
णात्यच्यत्योदनं देवदत्त इत्यत्र कर्मणो राध्यत्योदन इत्यत्र कर्तृत्वेपि न कर्मवत्त्वमिति बोध्यं । ननु कर
णात्वाद्यवस्थायां वस्तुतः सन्त्यसिध्याल्योल्योपारोन धातुनोपात्तः प्रकृतसूत्रे च धातोरेकाच इत्य
तो धातोरित्यनुवृत्त्यधातो वाच्चयाक्रियया तुल्यक्रिय इत्यर्थो तो नायं दोष तत्राह । किं चेति ।

कर्मणोत्पत्तेस्तस्मा मध्याद् दृश्यमानकर्मनिष्ठविशेषप्रयोजककर्मस्थक्रियालक्षणात् इति भावः नेतरस्त्विति
रात्र दर्शनग्रामगमनादौ कर्तृस्थैव हर्षाश्रुमूर्च्छादिलक्षणाविशेषदर्शनात् कर्तृस्थत्वेन व्यवहार इति भावः
उत्पादनार्थ इति उत्पत्त्यनुकूलव्यापारार्थ इत्यर्थः। उत्पत्तिफलकोपत्तो वाच्य इति तु न युक्तं बीजेनांकुर
कृत इत्यनापत्तेः एतेन ज्ञानस्य कर्तृस्थत्वेन न त्वात्मनेपदमिति शानजित्यर्थः। यगात्मनेपदयोस्त्वनु
पपद्यमाने इति स्यादिति भावः अन्योन्यं स्पृशत इति। अयं भावः कर्मपदेन तत्स्था क्रियालक्ष्यते ननु
कर्मलोपयोगिनीनत्स्था क्रियामात्राभावात्। एवं चान्योन्यमित्यादावुभयोः शब्दभेदेन कर्तृत्वकर्मत्वस
त्त्वाद्यैवैकस्मिन् संयोगानुकूलक्रियासंयोगो वा से वापरस्मिन् कर्तरीति कर्मस्थक्रियया तुल्यक्रियक
र्तृत्वात् प्राप्तिः आश्रयभेदाभेदेन च तुल्यत्वाव्याघातः यद्यपि इमो गंगां स्पृशत इत्यत्र कर्तृस्थः स्प
र्शस्तथापि प्रकृते कर्मणोस्तयोरन्योन्यसंयोगकृतहर्षादिलक्षणाविशेषदर्शनात् कर्मस्थः स इति
त्रज्ञामिति इदं तु चिंत्यं गमनानुकूलव्यापाररूपेणान्यानिष्ठफलेननेतद्व्यापारेणावातत्रविशेषाद
र्शनेन कर्मस्थक्रियत्वाभावात् यदि ग्रामसंयोगस्तथेत्युच्यते तर्हि ग्रामं गच्छतीत्यादौ ग्रामेऽपि पुरुष

ल॰ प्र॰ शे॰
९९
99

संयोगरूपविशेषदर्शनाद्गम्यर्थस्यापि कर्मस्यर्लस्यात्। अत एवान्योन्यमाश्लिष्यत इत्येव भाष्ये उदाहृतं॰ दुहि
पच्योरिति॰ अनयोर्द्विकर्मकत्वाय कृत्स्नकर्मणः कर्तृत्वेप्यपरेणास्तकर्मकत्वाद्व्याप्तेचनं। अर्थेत्वात्पचेस्त
ण्डुलानोदनं पचतीतिवद्द्विकर्मकत्वायद्यावृक्षस्य कर्मान्तरेणाफलपाकासंभवात्सचिरत्वविषयेद्विकर्मकः
कालस्कतदाकर्त्रोर्वहुलग्रहणंनेहपक्षेपरस्मैपदार्थंतस्यात्रानिष्ठत्वात्। विकल्पेनेष्यत इति दुहेरात्म
नेनेति भावः कर्मकर्तेरितिशब्दः पूरेद्दुहेश्चिण्वेतिर्न दर्थः॰ गोः पय इति॰ अप्रधानगोरूपकर्मस्याएवतथावि
वक्षानात्पुंसेतिभावः गोः पयस्सृजतीत्यतदर्थः॰ अचः कर्म॰ चिण्वते इत्यतश्चिण्णोतिरीयतेनेत्यतोन्यत
रस्यामितिचानुवर्त्तते इह सूत्रमन्त्राख्यानेपतितं करोतिपर्यंते गतं चितं। अद्धोपपन्न इति॰ स च मुख्यकर्त्रै
वेतितत्त्वार्थं ताप्राप्तकर्मवत्त्वादावार्थं युजेस्तु कर्मकर्त्तरि सकर्मकत्वेन प्रतिप्रसवविधानार्थं॰ युज्यते ब्रह्मे
ति॰ योगो ब्रह्मचारिणां युनक्ति संबंधानुकूलव्यापारवान् भवतीति पूर्वकत्वात् तेयुङ्क्ते प्रतियोगिता
वच्छिन्नसंबंधाश्रयकत्वे ब्रह्मचारिणः कर्तृत्वं प्रतियोगितात्रयत्वाद्वयोगस्यकर्मत्वं बोध्यं॰ भूषाकर्मेति॰
कर्मशब्दः क्रियापरः पद्यविभूषावाचिनपतेषु रोमन्थीत्यनेन यकु चिणोः प्रतिषेधः सिद्धस्तया

पि चिरव्यदिडमा वायेदं। अन्यत्रात्मनेपदादिषूक्तेस्त्वयाणामपि निषेध इत्याह यगित्यादि। अवकिरते इति। कश्चि
त्पुरुषः स्वादिनाहस्तिनमवकिरतीति पूर्वकक्षा। कृञ्दृदध्मप्रच्छः किरादयः। तत्राद्ययोः कर्मस्थक्रियत्वात्मनेपद
व्यतिरिक्तनिषेधार्थमन्येषां कर्तृस्थक्रियत्वेन आत्मनेपदविध्यर्थमिदं। विध्यर्थमिदमिति। अयं भावः। उप
वासादितपस्तापसं तपति दुःखयतीत्यर्थः। एवं च तापसस्य कर्मत्वेन यदुःखजननमर्थः। कर्तृत्वे तु अर्जन
मर्थस्तापसस्तपोऽर्जयतीत्यर्थः। एवं च क्रियाभेदात्कर्मकत्वाद्यप्राप्ते विधिरिति। इत्यनुसारिणा इति।
भाष्येऽलेवकारस्य सामर्थ्यान्नियमाद्येऽलमुक्तं तत्र हि सकर्मकाणां प्रतिषेधो वक्तव्य इत्यस्य प्रत्याख्यानायतये
वांसकर्मकस्यैव वचनं नियमार्थं तपेरेव सकर्मकस्य नान्यस्येति। तपेरिति योगविभागे नायं नियमः।
तपश्च तपःकर्मकस्यैव कर्मवदिति तेनेह न उत्तपति सुवर्णं सुवर्णकारः। उत्तप्यमानं सुवर्णं
सुवर्णकारमुत्तपतीति। उक्तं तस्यायं भावः। यद्यप्युपवासादिरूपं तपस्तापसं तपतीत्यत्र तपिर्दुःखा
र्थः तपस्तं दुःखयतीत्यर्थात्तापसस्तप्यत इति तापसस्य कर्तृत्वे र्जनार्थः तापसस्तदर्जयतीत्यर्थोक्तं।
एवं च कर्मस्थक्रियपातुल्यक्रियत्वस्य कर्तरि अभाव इति न कर्मवद्भावप्राप्तिस्तथापि शरीरसंतापः

ल॰शा॰शे॰
१००
100

लक्षणायाः क्रियायाश्च वस्याद्दूयेपि तुल्यत्वात्तत्प्राप्तिः। तथा हि तपस्तापसं तपतीत्यत्र ज्ञानजनकोपवासादि रू
पसंतापविशेषः तापसं तापयतीत्यर्थः। अंतर्भावितण्यर्थोऽत्र तपिः। तापसवृत्तिशरीरसंतापसामान्यानुकूल
व्यापारानुकूलव्यापारः संतापविशेषवृत्तिरिति बोधः। तदनुकूलव्यापारश्च संतापविशेषस्वरूपाववस्थान
रूप एव। तापसे शरीरसंतापसामान्यानुकूलव्यापारविशेषस्वीकार एव णर्थे त्यागे तापसस्य कर्तृत्वं। ता
पसस्तपः संतप्यत इत्यत्र संतापविशेषाभिन्नशरीरसंतापानुकूलव्यापारस्तापसकर्तृक इति बोधः। सव्या
पार एव चाऽर्जितं। तत्र क्रियाविशेषणत्वात्स्तोकमेधत इत्यादाविव तपसः कर्मत्वं भाष्यप्रामाण्यादेवोपपादे
वसामान्यविशेषभावे सत्यपि निष्क्रियाविशेषणेऽतापसेन तपस्तप्यत इत्यादौ कर्मणि लकारो भव
त्येवेति बोध्यं। तदुक्तं भाष्ये। यथा गोपोषमपुषदित्यादौ सामान्यपुषेरवयवपुषिः कर्म एवं तापसेन त
पस्तप्यत इत्यादौ सामान्यतपेरवयवतपिः कर्मेति। अवयवतपिरित्यस्य विशेषतपिर्ज्ञानजनकोपवा
सादिरूपं तप इत्यर्थः। अत एव कर्मणि लकारः। प्रत्ययार्थेऽप्रश्नेत एव संताप इति भाष्ये उक्तं। यस्कोते
इति। यस्त्वन्नानुकूलोत्कण्ठोत्पादनं स्तौतेरर्थः। प्रास्तोष्टेति। स्तुक्रमोरिति नियमाद्गुणादिलक्षणां इ शा॰म॰
१००

गत· केवलनमतेरकर्मकत्वादाह· अन्तर्भावितेति· चिरावदृष्टत्वादिति· उक्तवीजमेतत्तदाब्रूतेकथ्येति उच्चा
रणेन शब्देप्राकट्यरूपविशेषदर्शनात्कर्मण्यक्रियत्वमस्येति बोध्यं· शिष्यंश्रावि· अत्र कर्मकर्तृत्वं विना
यकर्मकास्तत्रात्मनेपदाकर्मकशब्देन गृह्यन्ते· कर्मकर्तृत्वेनाकर्मकत्वस्याव्यभिचरितत्वात्· तेषामन्तर
भावितण्यर्थत्वेन सकर्मकतांगत्वा पुनः सौकर्यातिशयविवक्षायां कर्मकर्तृत्वं बोध्यं (उदहृप्युच्छतेति· पु
च्छमुदस्तवानित्यर्थः व्यकारिष्टेति चिणि निषिद्धे स्यपत्त्वाभावाश्चण्ड्· भावे सिचि चिण्वदिट्वृद्धिः तद
भावपक्षे आह व्यकृतेति· ह्रस्वादङ्गादिति सिचो लोपः इति कर्मकर्तृप्रक्रिया लकाराणां कालविषये उ
त्सर्गापवादशास्त्राण्याहाभिहा· भूत इत्यधिकारः अनद्यतने लङिति· त्यत्तो नद्यतन इति वर्त्तते· एवं बु
ध्यसे इत्यादि· अत्र मानं दृष्टं वित्यं· अगमं अपहाति· अभिज्ञेति लृट् टोनेन निषेधेऽत्रौत्सर्गिको लङ्। सा
कांक्ष इति विद्यमानाकांक्षे इत्यर्थः तेनाकांक्षानिरूपके तद्विषये च सिध्यति वत्स्याम इति· लक्ष्म ल
क्षणाभावस्य विवक्षितत्वात्साकांक्षता बोध्या· लक्ष्यं ज्ञापकं· लक्ष्यं ज्ञाप्यं· परत्वादिति नेति नो भयत्र
विभाषेयमिति भावः चिन्नचिक्षिपादिनेति· आदिनावायमनोऽसंनिधानादि संग्रहः अल्पतेति·

त॰शा॰शे॰ १०१ अपरोक्षार्थमिदं तद्दृशागमनोत्तरकालिकवाक्यप्रश्ने तत्कारणागमनस्यैवापलापार्थं तत्रापह्नवउदाहर
णो बोध्यः। अबाधितपरोक्षविपरीतबोधजनकतदुपपादकाभावप्रकृतियादिनमत्यंतापह्नवः अत्र कलिंगवा
साधुपपादकं कलिंगगमनादिति न विनातद्संभवात्। नाहं कलिंगान् जगामेत्येव पाठः जनपदवाचिनो
नित्यबहुवचनांतत्वात्। प्रश्ने चासन्ने। प्रश्नविषयीभूतासन्नकालिकभूतानद्यतनपरोक्षार्थाद्धातो
रित्यर्थः। पुरातिस्मेति। स्मशब्दो भूतकालद्योतकः। एवं स्मेति। एवंशब्दोऽपरोक्षत्वद्योतकः। ननौ पृष्ट-
पृष्टग्रहणं वचनं वचनप्रतीत्याघर्थ्यसंभावनावारणाय यस्याश्रमादिदर्शनेन तत्क्रियानुवृत्तिमारोप्य
वर्त्तमानेलट् तदा ननु कुर्वंतं पश्येति शब्दादिभवति। सूत्रं तु तदनारोपे भूतत्वविवक्षायां लुङ्बाधना
र्थं शतानंतरस्येति निपातयाद्दूर्त्तमानेलडिति विहितस्यैवेति स्पष्टमाकरे। नन्वोः अनयोर्योगे भूतसामा
न्ये पृष्टप्रतिवचने लडित्यर्थः। पक्षे लुङ्। अनद्यतने तु लङेव। अनुवर्त्तते इति। भविष्यति गम्यादि
य इति सूत्रात्। किंवृत्ते कि मावृत्ते। निष्पन्ने तस्मिन्नुपपद इत्यर्थः। ते च कः कतरः कतम इति त्रय ए
वेति वृत्तिः। यद्वृत्तान्नित्यमिति सूत्रस्थभाष्यरीत्या सर्वग्रहणमित्यन्ये। उदाहरणे तादृशप्रश्ने न राम॰ १०१

प्रष्टु लिप्सा गम्यते उत्तरसूत्रोदाहरणेपि तादृशप्रयोगेणावक्तु लिप्सा गम्यते अत्र किंवृत्त ग्रहणं तु लिप्स

मानसिद्धिरहितायां लिप्सायाम किंवृत्ते लट्‌ऽनिवृत्त्यर्थं लोडर्थो लोडर्थः प्रैषादिः विषयधात्वर्थलक्षणे

इत्यर्थः कृत्स्नमौ सनं चैव विषयगोचरणस्य लक्षणं वाध्यं ऊर्ध्वमिति द्वितीयांतमत्र कर्मैकधातुयोगेका

लादीनां कर्मत्वान्के: ऊर्ध्वमिति दिक्शब्दयोगे मुहूर्तादिति पंचमी तद्धितार्थेत्यत्र दिक्संख्ये इत्यनुवर्त्ते

नात्समानाधिकरणाधिकाराच्चेह समासो दुर्लभोत आह निपातनादिति भवार्थे कालादृञ् स्वार्थे ष्य

ञिति चातुर्वर्ण्यादित्वात् वतकरणात्भूपमर्थमाह येनोपाधिनेति आशंसायामप्राप्तप्राप्तीच्छा आशं

सात स्या वर्त्तमानत्वेपि तद्विषयस्य वर्षादेर्भविष्यत्वाद्भविष्यतीत्युक्तं आशंसमानक्रियावाचकाद्धातोरि

त्यर्थः देवश्चेदिति वृष्टिवापयोरुभयोरप्याशंसाविषयत्वादुभयत्राप्ययं लकारः पूर्वविषये इति आशंस

सायामित्यर्थस्तेन तत्रापवादोऽयं तदाह नेतीति नभूतवदिति नापि वर्त्तमानवदित्यपि बोध्यं अत्राशं

सायामित्येतदपवादत्वात् क्षिप्रप्रयोगेपि परत्वादिदमेवेत्याह आशंसे क्षिप्रमिति नानद्यतनवत् प्रबंध

सातत्ये लङ्लुटौ नेति भूतानद्यतने लङ् न भविष्यत्यनद्यतने लुडिति भावः सामीप्यं चात्रका

श्चात्र कालकृतं तच्च प्रयोगकालापेक्षया कालस्य सामीप्यं तुल्यजातीयेनाव्यवधानं देशसामीप्ययोरयं देशोति
क्रांतश्चागामीवा तस्मिन्नवधितश्चावधारणात इत्युदाहरणामिति किं चित्राप्रविष्यति मा अक्रियाप्रबंधार्थे समसा
मीप्यार्थे चेदं पचयिषाव्यो ऽक्रियाप्रबंधार्थमिदं क्रियाप्रबंधार्थे लेवचनानर्थकं सिद्धं क्रियाप्रबंधेपूर्वे
रा वेति उक्तं तथापि तत्सामीप्यस्याप्युपलक्षणामिति किं यटः अस्सामीप्यरात्रौ द्विवयोदाहरणान्निधा
नमित्यन्ये अभविष्यति अमर्यादायामवरस्मिन्नहोरात्रविभागे वा क्रियाप्रबंधे नानद्यतनवदिति पूर्वसूत्र
मेवव्यतइति भाष्यस्पष्टं भविष्यति किं योमध्वाति क्रांतइत्यादौ सक्तून पिबामित्येव मर्यादेति किं योय
मध्वागंतव्यो निरवधिकस्तस्य यदवरं साकेतादित्यादौ पाताऽस्मेत्येव अवरस्मिन्निति किं तस्य यत्परमिति
प्रयोगे पाताऽस्मेत्येव यथा स्यादिति कालवि॰ कालकृतमर्यादोक्तावरस्य विभागे सतीत्यर्थः अ
होरात्रसंबंधिनीति अनहोरात्राणामिति शेषषष्ठी न कर्त्तरि नायिकर्मरणीति भावः मर्यादावर
यारत्यतरस्मिन्नप्यहोरात्रसंबंधिनिनेति तात्पर्यं प्रतिषेधार्थमिति क्रियासातत्याद्यसत्वे इत्यर्थः
तत्सत्वे होरात्रसंबंधिनि विभागे यिनानद्यतनवदित्यस्य षेधः तस्य योवरः पंचदशरात्र इति पं

चदृशात्र इति बहुव्रीहिः अत्र त्वं चेति योगविभागात् समासान्तो नः पुंस्त्वं पक्षोन्यपदार्थः पृषोदरादित्वा
त्मयूरव्यंसकादित्वाद्वा साधुत्वं परस्मिन्नि कालविभागे एवेदमिति भाष्ये स्पष्टं वर्त्स्यमिति संपत्तात् क्रमेणाप
चोयत् भूते च पूर्वसूत्रमिति अनुवृत्त्य पूर्वसूत्रकोयमधिकारः समानकर्तृकेष्विति यावत् उताप्यो
रित्यतः पूर्वं तु वा ग्रहणासंबद्धमेतदधिक्रियते तत्र गर्हायां लडपीत्यत्र नासंबंधः लिङ्विधाने न तद्विष
ये लिङ् निमित्ताभावात् परत्वादिति उक्तवत्त्वात् अनवकाशत्वादित्यर्थः। गर्हायामिति भविष्यतीत्यादि
निवृत्तं तदाह कालत्रये इति अन्यथा भविष्यतीति क्रियातिपत्तावित्यपि वाध्यं कथमो गर्हायाश्च लिङ्नि
मित्तस्य सत्वादिति भावः किंवृत्ते कालत्रये एतौ स्तः लृट् इति नोक्तं लट् द्वारणाय प्राग्वदिति भूते वा भवि
ष्यति नित्यमित्यर्थः लिङ् निमित्त इति सूत्रमत्रानुवर्त्य वाक्यभेदेन संबध्यत इति भावः एतेन तद्विषये पि
परत्वादिदमेवोचितमित्यपास्तं अनवक्लृप्त एतयोर्विषये कालत्रये लिङ् लृटावित्यर्थः इहाप्ययासं
ख्यं नेष्यते। प्राग्वदिति भूते वा भविष्यति नित्यमित्यर्थः लिङोऽपवाद इति पूर्वसूत्रेणान्यतरयोः प्राप्तयो
र्लट् ग्रहणेन लिङो निवृत्तिरिति भावः अत्र लृङ् इति लिङो निवृत्त्या एतयुक्तानवक्लृप्त्यादेर्लि

ल·शु०शे०
१०३
103

ङ्ङिमित्तत्वाभावादितिभावः यच्चयत्रयोः अयमपि लृङपवादः योगविभाग उत्तरत्रानयोरेवानुवृत्त्यर्थः लृङ्
प्राग्वत् लिङ्‌ चेति अनेन परत्वाल्लिङि भाषाकथमितिलटः किंकृत्त इत्यस्य च बाधादितिभावः लृङ् प्राग्वत्
शेषे लृ अत्र लृङ् यदि सोधीयीतेतिजातु यदोरित्यत्र यदाय घोरित्युपसंख्यानाल्लिङ् भूतेपीति वा ग्रहणा
स्सनि वृत्त्वात्स्वविष्यतीव भूतेपि नित्यमित्यर्थः कामप्रवेदः सर्वलापवादः अकच्चितीत्यस्य कच्चिच्छब्दप्रयो
गाभाव इत्यर्थः तदाह न लिविति कच्चिज्जीवतीति अयं प्रश्न एव कामप्रवेदनद्योतक इतिभावः कच्चिच्छब्द
स्येच्छार्थे कत्वाभावादिच्छार्थे षित्यप्यत्र न प्रवर्त्तते प्रौढिः क्रियायाः कृत्यसाध्यताविरहवोधनं संभा
वनं क्रियायोग्यताविषयोत्कटकोटिकज्ञानं विपरिणाम्यत इति आवत्यै विपरिणाम्यत इत्यर्थः तच्चे
दिति इमां क्रियामनुष्ठातुं समर्थ इत्येवंरूपं चेत्तत्संभावनमितिभावः अत्रापि लृङ् प्राग्वत् सिद्धा
प्रयोगे इति यत्र तत्प्रयोगं विनापि तदर्थो गम्यत इत्यर्थः अपि गिरिमिति संभावनस्य धात्वर्थे विष
यसामर्थ्ये विषयताध्वनकोपि शब्दः क्वचित्प्रकरणादिकमपि तद्ध्वेति बोध्यं संभावयामीति भोक्तुं
ने भवान् शक्त इत्युत्प्रेक्ष इत्यर्थः प्रत्युदाहरणे पूर्वेणालिङ् वास्यादिति विभाषेति पूर्वेण राम०
१०३

वादस्तुवर्त्तते· स्मृतेइतिलिङि· वर्त्तमानेपुनर्लिङ्ग्रहणादेतद्विशेषलाभः हंतीति· हननंहेतुःपत्ता
यनंकार्यं· गर्हायांलडपीत्यतोभविष्यतीतिनिवृत्त्याकालत्रयेपिएतेप्रत्ययाइतिश्चात्रप्राप्तिःलृङ्प्राग्व
त्· उपसंवादाशंकयोश्चेतिलिङ्गुच्यः उपसंवादः कर्त्तव्येपणबंधः यदिमेभवानिदंकुर्यादहमपिते
इदंददामि त्युदाहरणं· अत्रचावश्यंवधिमद्भाव एवप्रतीयतेनहेतुहेतुमद्भावइतिनहेतुहेतुमतोरि
त्यनेनसिद्धिः आशंकोत्प्रेक्षा· तेनसधिषोपिस्यात्प्रासादस्त्रासामिष्टकानांस्यादित्यादेःसिद्धिःस्पष्ट
चेदमुपसंवादाशंकयोरितिसूत्रभाष्ये· इच्छार्थेषुसर्वलायवादः लृङ्· प्राग्वत् इच्छार्थेषु इच्छार्थेपदेउ
पपदेइतिसूत्रार्थः कामप्रवेदने· स्वाभिप्रायाविष्करणं· तच्चप्रयोक्तुरितिबोध्यं· इदंनस्वतंत्रंविधायकं·
किंतुसूत्रशेषभूतमन्यथावलेकमेवातोव्यावर्त्यमेवदर्शयति· नेहेच्छन्निति । विधिनि। प्रवर्त्तनाविचार
प्रार्थनाविषयार्थवाचकाद्धातोरित्यर्थः प्रैषातिसर्गेत्यनयोर्विध्यामंत्रणाभ्यामभेदेपिनिमंत्रणादि
षुकृत्यव्यावृत्त्यर्थंग्रहणं। प्राप्तकालेकृत्याश्चेत्युक्तेहितेष्वपितेस्युः सामान्यविहितकृत्यानांप्रै
षादिषुलोटाबाधामाभूदितिकृत्यविधिः प्राप्तकालार्थमिति· प्रैषातिसर्गयोःपूर्वेणलोटुद्वितिस्त्र

ल.श.शे. त्रेणासिद्धत्वादिति भावः। लिङ्प्राप्तकालेऽप्राप्तस्य लिङो विधानार्थमिदं ह्यन्यथो विध्यादिसूत्रेणासिद्धेः
१०४ चाद्यथाप्राप्तं लोट् कृत्याश्चान्यथा लिङ्गा तयोर्बाधः स्यात्। मुहूर्तादूर्ध्वं यजनं प्राप्तकालमित्यर्थः स्ते लोट्
प्रैषादयश्चोर्ध्वं मौहूर्तिक इति चानुवर्तते। यजतां स्मेति। स्मशब्दोऽधिकारसूचको भवानत्राधिकृत इत्य
104 र्थः। अधीष्टे लिङोऽपवादः। योगविभागादूर्ध्वं मौहूर्तिक इति निवृत्तं लिङ्गादिकालसमयवेलास्वित्यनु
वर्तते। यद्भवान् भुञ्जीत स काल इत्युदाहरणार्थः। भावे परत्वात्तुमुन्न भवेयं वा घते सर्वलापवादोऽयं ह्रे
कयोर्भोक्तरि गम्यमाने कृत्यादय इत्यर्थः। शकि: भावे क्रिय शक्तोऽगम्यमानायामित्यर्थः। सर्वलाप
वादत्वात् कृते कथमिति माङ्वृ इति सूत्रं सर्वलकारविषयेऽङाङ्हितलुङ् तत्प्रयोगार्थं वस्तुतः
सन्ताः स्मेवक्ष्याङ्। माङि स्मेति सूत्रभाष्येतथाध्वनितत्वात् धातुसंबंधे। प्रत्यया इत्युक्तो विधिरयं धा
तुसंबंध इत्युत्तरत्राप्यनुवर्तते स्वरितत्वात् संबंधस्य द्विष्ठत्वाद्द्विवचनांतेन समासः धातुशब्देन त
दर्थो लक्ष्यते तेन गोमानासीद्भवितेति सिध्यतीत दाह। धात्वर्थानामिति द्विवचनांतत्वमुचितं हा.म०
यत्रकाले इति। वर्त्तमानसामीप्य इत्यारभ्यकालानां पल्वप्रतियादनस्येव दर्शनादिति भावः। न १०४

न्त्वेवं वसन्तं ददर्शेत्यादौ भूते लडि वर्त्तमाने लिडित्यपि स्यादत आह नित्येति · भूते लडिति । अयं भावः
अनेन प्रयोगेऽश्रूयमाणानां कालान्तरे विधानं क्रियते एवं च भूते शतुः साधुत्वे बोधितेऽपि यत्प्रातर्द्ध्येकोल
डपि कल्प्येत एतेनानेन लघयिपुनरेतज्ज्ञापयत्यस्मान्नाभावाच्छतादिर्लभ्यते त्वपास्तं भाष्यकृतस्तु भावि
कृत्य भासीत् जनिष्यमाणः पुत्र आसीदित्यत्र भाव्यादिशब्देन प्रत्यये आसीच्छब्दप्रयोगतया युगपत्स
योगानुपपत्तिः यद्दिवं तत्कालं भावित्वादिना व्यवहृतं तदासीदित्यन्वयस्तर्हि ऽप्योतिष्टोमयाजीत्येवं व्य
हरिष्यमाणो भवितेत्येवमत्रापि बोधसंभवाद्धो मा नासीदित्यत्रापि योगमानित्येवं व्यवहरिष्यमाणा आ
सीदिति बोधसंभवाद्धो मद्दूपस्यातीतत्वाद्धा भूते प्रत्यये थोद्दवाभव्यतीतत्वप्रत्ययसंभवात्सूत्रं व्यर्थं
वसन्तं ददर्शेत्यादौ च दर्शनकालिकं वासस्य वर्त्तमानत्वबुद्ध्यर्थं स्याकृत्यप्रत्ययस्तत्फलं च तत्तमा
नकालत्वप्रसयोर्द्दर्शने · भातेस्यते क्रिययोः समानकालत्वप्रतीतेः ननु चोत्यते तैर्वचनलोपंचो
दित्ताः स्म इति सरूपसूत्रस्थभाष्यप्रयोगस्याप्येवमेवोपपत्तिरित्याहुः क्रियासमभिहारे धा
तुसंबंध इति वर्त्तते क्रियासमभिहार इत्येतत्प्रकृत्यर्थे विशेषणं तद्विशिष्टक्रियावाचकाद्धातो

ल॰ शा॰ शे॰
१०५
105

लोट् सर्वलापवाद इत्यदाह यथोस्येर इतित सेति लोट इत्यर्थः यदि तिवारी नोऽस्थाने स्यात्तं तदास्था निवत्त्वेन
पित्वाह्लुनीहीत्या दावीत्वादिनस्यादिति भावः तौ चेति लोडित्यनुवर्त्यो हि स्वो लोडादेशा हि स्वव दित्यर्थ इति
भावः उक्तातिदेशबलादेवाह तिङ् संज्ञो चेति तेन पदत्वसिद्धिः उक्तातिदेशबलादेव सार्वधातुकत्वात्तङ्
शिषे शिध्वे त्येवायमीषे इत्यत्र शः सेदित्यस्य प्रवृत्तिः नन्वाचनध्वमोरिति वाक्यशेषात्संगतिर्भुतिङां हि स्वा
र्थाबाधेन तध्वमोरभावादतस्त्राहृतध्वमा विषय इति विषयसप्तमी सेति भावः तत्र शाब्दो मध्यमैकवचनमे
व व्याख्यानात्त हिः कर्त्तरीति कर्त्रादयश्च कालसंख्यावदनुप्रयोगेऽवनियोधाः एवं च कर्त्तरीत्यादेः
कर्त्र्याद्यर्थे कानुप्रयोग इत्येवार्थः भावकर्मार्थिकानुप्रयोगे परस्मैपदरिष्यापि स्व इतियुक्तं समुच्चयेन्य।
स्तत्र समभिहारयद्वहितं पूर्वे सूत्रे संपूर्णमनुवर्तते समुच्चीयमान क्रियावृत्ते र्धातोरित्यर्थः स्वत
एव कारकसमुच्चये नास्य प्रवृत्तिः विकल्पस्य लोटैवान्वयो न तु हि स्वाभ्यां व्याख्यानात् यथा विध्यनु।
स्त्रस्य व्यवहितादिप्रयोगोपि लुनीहि लुनीहीत्येवायं लुनातीति भाष्यप्रयोगात् समुच्चये यथा।
सामान्यवचनत्वं च समुच्चितार्थबोधकधात्वपेक्षयेवोपस्थितत्वात्तत्वं चानुप्रविष्ट समुच्चि

राम॰
१०५